त्कटे।९।स्त्री वचाहृतयोरुष्ट्री कर्कट्यां करभे पुमान्।उस्रो वृषे च किरणे पुंस्यर्जुन्युपविश्रयोः।१०।ऐन्द्रिः काके जयंते नाऽथोड्राः पुंभूम्नि नीवृति।
ओड्रः स्यात्तु जपापुष्पे हारं नीरे स्त्ररोंबुदे।११।करो वर्षोपले रश्मौ पाणौ प्रत्यायशुंडयोः।कद्रुस्त्रि पुंस्त्वर्णपिंगे नागानां मातरि स्त्रियां।१२।कारो वधे नि
श्चये च बलौ यत्नेयतावपि तुषारस्थले पि पुमान् स्त्रियां दूत्यां प्रसेवके।१३।सुवर्णकारिकायां च बंधनागारबंधयोः।हारो रसांतरे धूर्ते लवणे काच
भस्मनोः।१४।कारिः स्त्रियां क्रियायां स्याद्वाच्यलिंगस्तु शिल्पिनि।कारुर्विश्वकर्मणि ना त्रिषु कारकशिल्पिनोः।१५।क्षीरं दुग्धे जले कीरः शुके पुंभूम्नि
नीवृति।कुरुर्नृपांतरे भक्ते पुमान् पुंभूम्नि नीवृति।१६।क्षुद्रः स्यादधमे क्रूरे कृपणेऽल्पे पुवाच्यवत्।क्षुद्रा व्यंगा नटी कंटकारिका सरघासु च।१७।चोगे
री विस्रपयोर्हिंस्रा मक्षिकामात्रकेषु च।क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे।१८।क्रूरस्तु कठिने घोरे नृशंसेऽप्यभिधेयवत्।कृच्छ्रमाख्या
तमाभीले पापसंतापनादिनोः।१९।क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः।क्रोष्ट्री शृगालिकारुक्षविदारी लांगलीषु च।२०।क्षौद्रं मधुनि पा
नीये खरः स्यात्तीक्ष्णधर्मयोः।गर्दभे स्त्री देवताडे खरुर्दर्पे हरे हये।२१।दंतु पुंसि त्रिषु श्वेते खुरं कोलदले शफे।गरी स्वरापाकरणे क्लीबं नोपवि
षे विषे।२२।गात्रं गजाग्रजंघादौ क्लीबमंगे कलेवरे।गीः स्त्री भाषासरस्वत्योर्गिरिर्ना नेत्ररुग्भिदि।२३।अद्रौ गिरियके योषि [illegible] पुन
स्त्रिषु।गुंद्रस्तेजनके स्त्री तु प्रियंगौ भद्रमुस्तके।२५।गुरुस्त्रिलिंग्यां महति दुर्जरालघुनोरपि।पुमान्निषेकादिकारे पित्रादौ सुरमंत्रिणि।२६।

ध्रः खगांतरे पुंसि वाच्यलिंगो थ लुब्धके। गोत्रा भूगव्ययो र्गोत्रः शैले गोत्रं कुलाख्ययोः। २६। संभावनीयबोधे च कानने क्षेत्र वर्त्मसु। गोरः पीते
ऽरुणे श्वेते विशुद्धे चाभिधेयवत्। २७। नाश्वेतसर्षपे वैद्धनद्धयोः पद्मकेसरे। गौरी त्वसंजातरजःकन्याशंकरभार्ययोः। २८। रोचनी रजनी प्रि
ग्रा प्रियंगु वसुधा सु च। आपगा या विशेषे पि यादसां पतियोषिति। २९। घसस्तु दिवसे हिंसे घोरे भीमे हरे पि च। घरोऽद्भुतभेदे च भीमे चारे
त्रसे बले। ३०। चंद्रः कर्पूरकांपिल्लसुधांशुस्वर्णवारिषु। चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथांगयोः। ३१। राष्ट्रे दंभांतरे कुंभकारोपकरणा
स्त्रयोः। जलावर्त्ते पि च वक्रः पुमान् हव्यान्नभांडयोः। ३२। चारः पियालवृक्षे स्याज्ञतौ बंधापसर्पयोः। चारुर्वृहस्पतौ पुंसि शोभने प्यभिधेय
वत्। ३३। चित्रा खुपर्णी गोडुंबा सुभद्रा दंतिका सु च। मायायां सर्पनक्षत्रे नदीभेदे सु च स्त्रियां। ३४। तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि।
तद्युक्तयोस्त्विध लिंगं चीरी झिल्ल्यां नपुंसकं। ३५। गोस्तने वस्त्रभेदे च वरे रेखालेखनभेदयोः। चुक्रं वृक्षाम्लचांगेर्यां स्त्री पुंस्यम्लेऽम्लवेतसा। ३
६। चैत्रं मृतदेवकुले ना भून्मासभेदयोः। चोरः पाटच्चरे पि स्याच्चोरपुष्प्यौषधावपि। ३७। छत्रा मिसावतिछत्रे कुस्तुंबुरुशिलींध्रयोः। न
पुंसकं चातपत्रे छिद्रं दूषणरंध्रयोः। ३८। जारी स्याद्दोषधीभेदे स्त्रियामुपपतौ पुमान्। जीरस्तु जरणे खड्गे। टारो रंगतुरंगयोः। ३९। तरस्तु तरणे
पुंसि दृश्या लौ वेटके तरी। तंत्रं कुटुंबकृत्ये स्यात् सिद्धांते चौषधोत्तमे। ४०। प्रधाने तंतुवाये च शास्त्रभेदे परिच्छदे। श्रुतिशाखांतरे हेतावुभया
र्थप्रयोजके। ४१। इतिकर्त्तव्यतायां च तंत्री वीणागुणे मता। अमृतादेहशिवयोस्तंद्री निद्राप्रमीलयोः। ४२। तारो वानरभिन्मुक्ताविशुद्ध्योः
शुद्धमौक्तिके। नानक्षत्रेऽक्षिमध्ये च न ना रूप्ये नपुंसकं। ४३। स्त्री तु बुद्धदेवताभेदे वालिग्रीष्पतिभार्ययोः। त्रिलिंगो तु च्छ शाष्ट्रे च ताम्रस्तूल्व
रुणे पि च। ४४। तीव्रा तु कटुरोहिण्यां राजिकागंडदूर्वयोः। त्रिषु त्वत्यनितांते च कटे तीरं तु रोधसि। ४५। पुंसि त्रपुणि तोत्रं तु प्राजने वेणुके
पि च। ४६। दरो स्त्री साध्वसे गर्त्ते कंदरे तु दरी स्त्रियां। ४६। दराव्ययं मनागर्थे दस्त्रः खरेऽश्विनीसुते। दारु स्यात् त्रिपुले काष्ठे देवदारौ नपुंसकं। ४७।

द्वारं निर्गमने विस्यादम्बुपाये धरे गिरौ । कर्पासतूलके कूर्मराजे वस्वन्तरे ऽपि च ॥४८॥ धूतविश्वंभरायां च स्त्री गर्भाशयभेदयोः । धात्री जनन्यामलकी
वसुमत्युपमातृषु ॥४९॥ धारा सैन्याग्रिमस्कंधे तुरंगगतिपंचके । घटादिछिद्रसंतत्योः प्रपाते स्याद्वस्य च ॥५०॥ खड्गादेर्निशितमुखे धारोऽस्त्रा वा
न्तरे ऽपृणे । धीरो धैर्यान्विते स्वैरे धीरः स्यात्रिषु पंडिते ॥५१॥ स्वच्छंदे धैर्ययुक्ते च कुंकुमे तु नपुंसकं । स्त्रियां श्रवणतुल्यायां धौमं धूम्रत्व ईरितं ।
॥५२॥ तथावाप्तस्थानभेदे नरो ऽजे मनुजे ऽर्जुने । क्लीबं तु रामकर्पूरे न कं स्यादग्रदारुणि ॥५३॥ नासायां पुंसि कुंभीरे नारसत्तणकनीरयोः । नीध्रं
नेमौ वल्मीके वा रेवतीभे ऽपि कानने ॥५४॥ नेत्रं पथ्यि गुणे वस्त्रभेदे मूले द्रुमस्य च । रथे च वस्तु विनद्यां तु नेत्री नेतरि वाच्यवत् ॥५५॥ परः श्रे
ष्ठारिदूरान्योत्तरे क्लीबं तु केवले । पत्रं तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः ॥५६॥ पारं परतटे प्रांते न स्त्री पारा नदीभिदि । पारी पूरे च
कर्कर्यां पादरज्जौ च दंतिनः ॥५७॥ पात्रं तु भाजने पात्रे स्रुवादौ राजमंत्रिणि । तीरद्वयांतरे चाथ पुरुः प्राज्ये ऽभिधेयवत् ॥५८॥ पुंसि स्याद्देव
लोके च नृपभेदपरागयोः । पुरं नपुंसकं गेहे देहपाटलिपुत्रयोः ॥५९॥ पुष्पादीनां दलावृत्तौ ना गुग्गुलौ न ना पुरि । पुंड्रो दैत्यविशे
षेक्षुभेदयोरतिमुक्तके ॥६०॥ चित्रे क्रमे ऽपुंडरीके पुंभूम्नि नीवृदंतरे । पूरो जलसमूहे स्याद्व्रणसंशुद्धिखाद्ययोः ॥६१॥ पोत्रं वस्त्रे मुखा
ग्रे च शूकरस्य हलस्य च । पौरं त्रिषु पुरोद्भूते कारणे तु नपुंसकं ॥६२॥ वरो जामातरि वृतौ देवतादेरभीप्सिते । षिड्गे पुंसि त्रिषु श्रेष्ठे
कुंकुमे तु नपुंसकं ॥६३॥ वरी प्रोक्ता शतावर्यां वरा च स्यात्फलत्रिके । मनागिष्टे वरं क्लीबे केचिदाहुस्तदव्ययं ॥६४॥ वभ्रुर्वैश्वानरे
शूलपाणौ च गरुडध्वजे । विशाले नकुले पुंसि पिंगले त्वभिधेयवत् ॥६५॥ वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकं । त्रिषु क्रूरे च कुटि
ले वारः सूर्यादिवासरे ॥६६॥ वारो हरे कुब्जवृक्षे हंदावसरयोः क्षणे । वारी स्याद्गजबंधन्यां कलश्यामपि योषिति ॥६७॥ वारिर्वीग
जबंधन्योः स्त्री क्लीबं तु ह्रीवालके । वीरो रसविशेषे स्यादुत्तरे सुभटे त्रिषु ॥६८॥ स्त्री मुरव्दीरका काकोली तामलक्यैलवालुके । पतिपुत्रवती

राम: ४५

रंभा विदारी दुग्धिका सुचा ।६९। मल्लहः क्षीरविदार्य्योः क्लीबं स्यादभ्रपानले पि च । मरुः स्वर्णे हरे पुंसि भारो तिशयभारयोः ।७०। मंद्रः शिवे खंजरीटे हृषभे तु कदंबके । करिजातिविशेषे ना क्लीबं मंगलमुस्तयोः ।७१। काचने च स्त्रियां रम्या कृष्णा व्योमनदीषु च । तिथिभेदे प्रसारिण्यां कटुफलानंतयोर ।७२। त्रिषु श्रेष्ठे च साधौ च नपुंसि करणांतरे । मारः स्याद्धीवधे विघ्ने पलानं क्लिश[illegible]के ।७३। भीरुरार्ते त्रिलिंगः स्याद्दरयोर षितियोषिति । महरिर्ना वासुदेवे च हरे च परमेष्ठिनि ।७४। नपुंसकं सुवर्ले च भाज्ये स्याद्वाच्यलिंगकः । मंत्रो वेदविशेषे स्याद्देवादीनां च साधने ।७५। गुह्यवादे पि च पुमान् मरुन्नो गिरिधन्वनोः । मात्रा कर्णविभूषायां वित्ते माने परिच्छदे ।७६। अक्षराद्यवयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे । मारो मृतौ स्मरे विघ्ने मारी चंड्यां जनक्षये ।७७। मारिः स्त्री मारणे वर्षे मित्रं सुहृदि न द्वयोः । सूर्ये पुंसि मुरा गंधद्रव्ये दैत्यांतरे पुमान् ।७८। यात्रा तु यापने विस्मा[illegible] क्रमनोत्सवयोः स्त्रियाः । रंध्रं तु दूषणे छिद्रे राष्ट्रं स्यादुपवर्त्तने ।७९। उपद्रवे क्लीबं पुंसि रुरुर्नो मृगदैत्ययोः । वेत्रं वेत्रसि पीयूषे [illegible] ।८०। रोध्रो नागलवे क्लीबमपराधे च किल्बिषे । रौद्रो घर्म्मे रसे चंड्यां स्त्री तीव्रे भीषणे त्रिषु ।८१। वज्रं स्याद्बालके धात्र्यां क्लीबं योगांतरे पुमान् । वज्रा स्नुह्यां गुडूच्यां च वज्री स्नुह्यंतरे स्मृता ।८२। दंभोलौ हीरके पत्नी [illegible] त्रपुवरत्नयोः । वक्रस्तु तेषु मान् स्त्री [illegible] ।८३। वक्रे पुरवे वस्त्रभेदे व्याघ्रो व्यासकल्पः [illegible] कुले । वस्त्रो नादि वसुलक्लीबं मंदिरे च चतुःपथे ।८४। व्याघ्रः स्यात्पुंसि [illegible] लेर [illegible] रंडकरंडयोः । श्रेष्ठे नरणधुत्तरस्थः कंटकार्य्यां च योषिति ।८५। ध्वजो रिपौ घने ध्वांते शैलभेदे च दानवे । वेरः कलेवरे क्लीबं वार्त्ताकौ कुंकुमे पि च ।८६। वोद्रीर स्त्रीप [illegible] एणपादे नागो नसाहोरुधांतरे । शस्त्रस्तेजनके वाणे दध्यग्रे ना शरं जले ।८७। शस्त्रं लोहास्त्रयोः क्लीबं छुरिकायां च योषिति । शक्रः पुमान्स्वेतराजे कुटजार्जुनभूरुहोः ।८८। शद्रिः न्नोमोघरे जिष्णौ शक्रुन्नीकोपवज्रयोः । शारिर्ना द्यूतोपकरणे स्त्रियां शकुनिकांतरे ।८९। [illegible] पि च । शारः स्याच्छबले वाच्यलिंगः पुंसि समीरणे ।९०। अश्रुतोपकरणे शारा संज्ञे नद्यां रागमात्रयोः । शिग्रुः पुष्पार्थगजपर्य्याणे व्यवहारांतरे

न्नौ शाकमात्रे च। शोभांजनमहीरुहे॥९०॥ ग्रंथिरो ना पिप्पलीमूले स्याद्धमन्यां च योषिति। शीघ्रं नलदे च क्रांगे क्लीबं द्रुतगतौ त्रिषु॥९२॥ अश्रं स्याद्रक्तके
क्लीबमुद्दीप्तशुक्लयोस्त्रिषु। शुक्रः स्याद्भार्गवे ज्येष्ठमासे वैश्वानरे पुमान्॥९३॥ रेतोक्षिरुग्भिदोः क्लीबं शूरः स्याद्यादवे भटे। स्वरुः पुमान्नृपखड्गे भि-
दुरेप्यध्वरे शरे॥९४॥ सत्रं यज्ञे सदादानाच्छादनारण्यकैतवे। सरो दध्यग्रगतस्नो नी स्वरो नासासमीरणे॥९५॥ उदात्तादावकारादौ षड्जादौ च ध्वनौ
पुमान्। सारो बले स्थिरांशे च मज्जनि पुंसि जले धने॥९६॥ न्याय्ये क्लीबं त्रिषु वरे सांद्रं वने घनेम्रदो। स्फारः स्यात्पुंसि विकटे कनकादेश्च बुद्बुदे॥
९७॥ सिप्रो निदाघसलिले सिप्रा तु सरिदंतरे। स्थिरा भूशालपर्ण्योर्नी शनौ मोक्षेऽचले द्विषु॥९८॥ सीरोऽर्के हलयोः पुंसि सुरा चषकमद्ययोः।
पुल्लिंगः स्त्री दिवि वेशे स्यात्सूत्रं तंतुव्यवस्थयोः॥९९॥ शास्त्रादिसूचनाग्रंथे स्वरः स्वरचन्द्रमंदयोः। हरिश्चंद्रार्कवातामस्वशुकभेकयमाहिषु॥१०
०॥ कपौ सिंहे हरे जेंशौ शक्रे लोकांतरे पुमान्। वाच्यवल्लिंग हरिते हीरो मुक्तावलौ युधि॥१०१॥ हारिः पथिकसंतानद्यूतादिभंगयोः स्त्रियां।
हिंस्रा त्वेलावली मांस्योः स्त्रियां सा तु केऽन्यवत्॥१०२॥ हीरस्तैलाबुकालहस्तेभ्यः पुंसि शंकरवज्रयोः। होरा लग्नेपि राश्यर्द्धे रेखाशास्त्रभि-
दोरपि॥१०३॥ र त्रि॥ अमरस्त्रिदशेप्यस्त्री संहारे कुलिशद्रुमे। स्त्री गुडूच्याममरावत्याः स्थूणादूर्वाजरायुषु॥१०४॥ अपरं तु जपश्चार्द्धे स्यादुत्तरा
यो तु योषिति। इतरस्मिन्नपि तथाऽर्वाचीनेप्यन्यलिंगवत्॥१०५॥ अधरस्तु पुमानोष्ठे हीनेऽनूर्द्ध्वे च वाच्यवत्। अध्वरः सावधाने स्याद्वसु-
भेदे क्रतौ पुमान्॥१०६॥ अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्यात्मसदृशेषु॥१०७॥ अवरं गजांत्यजं-
घादिदेशेपि चरमे त्रिषु। अंबरं तु द्वयोर्व्योम्नि सुगंध्यंतरवस्त्रयोः॥१०८॥ अगारमुल्मुके न स्त्री पुंलिंगस्तु महीसुते। अंकुरो रुधिरे लोम्नि पानीये
ऽभिनवोद्भिदि॥१०९॥ अजिरं प्रांगणे वाते विषये दर्दुरे तनौ। क्लीबं ह्यामत्तरं असवर्णयोः पुंसि शंकरे॥११०॥ असुरो वीतिहोत्रे स्याद्रात्रौ सेभास्करे
पुमान्॥ अंडीरः पुरुषे शक्तेऽरटं छदकपाटयोः॥१११॥ अवीराऽपतिपुत्रायां स्त्री सत्वरहिते त्रिषु। अगुरु क्लीबं जोंकक शिंशपयोर्वाच्यवल्लघुर

रामः
४६

46

नि ।१२। असुरा रजनीराश्योरसुरो देवारिभास्करयोः । आकरो निवहोत्पत्तिस्थाने श्रेष्ठेषु कथ्यते ।१३। आधारश्चाधिकरणे प्यालवालांबु
धारणे । आसारः स्यात्प्रसरणे वेगवद्वृष्टौ सुहृद्बले ।१४। आहारः स्यादाहरणे भोजने च पुमानयं । आशरस्तु पुमान्वैश्वानरे च रजनीचरे ।१५। आ
कार इंगिताकृत्योरितरोन्यत्र पामरे । इत्वर्यसत्यां पथिके क्रूरकर्मणि च त्रिषु ।१६। ईश्वरो मन्मथे शंभौ नाथे स्वामिनि चान्यवत् । ईश्वरी चेश्वरी
मायां मुद्गरे जठरे युधि ।१७। उदारो दातृमहतोर्दक्षिणे प्यभिधेयवत् । उर्वरा सर्वसस्याढ्यभूमौ स्याद्भूमिमात्रके ।१८। उत्तरा दिग्विशेषे च स्नु
षायामर्जुनस्य च । विराटस्य सुतेनास्याद्दूर्ध्वोदीच्योत्तमे त्रिषु ।१९। नपुंसकं प्रतिवाक्ये ऽथोद्धारश्चोद्धृतावृणे । उद्गारं वारिधारायामुद्गारस्त्र
द्विजिस्त्रुतः ।२०। एकाग्र्यमन्यलिंगं स्यादेकताने प्यनाकुले । औशीरं शयनासनचामरदंडेषु शीरजे प्योक्तं ।२१। कंकरः कर्करे ह्रद्दे दीने क्र
कचे च पक्षिभेदे च । कदरः श्वेतखदिरे क्रकचव्याधिभेदयोः ।२२। कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः । कर्बुरा कृष्णवृंतायां शबले पुनरन्यव
त् ।२३। कर्परः स्यात्कपाले च शस्त्रभेदकटाहयोः । कंधरो वारिवाहे स्याद्ग्रीवायां कंधरा मता ।२४। कर्बरः कथितो व्याघ्रे शिवायामपि कर्बरी
। केदारो जठरे स्तूपे किरिबौ वारणे मुनौ ।२५। करीरो वंशांकुरेऽस्त्री वृक्षभिद्घटयोः पुमान् । करीरी चीचिकायां च दंतमूले च दंतिनां ।२६
। कटित्रं रसनायां च वर्मांगे कटिवाससि । कच्छुरा स्त्री कपिकच्छ्वां च शट्यां दुःस्पर्शयोरपि ।२७। कच्छुरो पुंश्चले वाच्यलिंगः स्यात्सामरेऽपि वा । क
बरं लवणेऽस्त्री स्त्री शृग्वी तुंगीकचांतरे ।२८। कर्बुर्मायायां नारक्तः पापयोर्भेषजांतरे । कर्मारो जातिभेदे च त्वचिसारे च पुंस्ययं ।२९। करे
णुः कर्णिकारे च करेणी वशयोः स्त्रियां । कन्नुरं कुत्सिते वाच्यलिंगं तत्रे नपुंसकं ।३०। कर्करी भांडभेदे नादर्पणे कठिने त्रिषु । कडारः पिंग
ले दासे कलत्र श्रोणिभार्ययोः ।३१। दुर्गस्थाने नृपादीनां कटुः पुंसि राक्षसे । विद्याधरे महादेवे तथा स्यादस्त्रदेवने ।३२। कंदरस्त्वंकु
शे पुंसि गुहायां न नपुंसकं । कर्चूरः स्यात्पुमान्स्वच्छे द्रव्यां सुवर्णे तु नपुंसकं ।३३। काश्मीरं कुंकुमेपि स्यात्टंकपुष्करमूलयोः । कावेरी स्यात्सरि
द्भेदे पण्यनारीहरिद्रयोः ।३४। कांतारोऽस्त्री महारण्ये बिले दुर्गमवर्त्मनि । पुंसि स्यादिक्षुभेदेऽथ किशोरोऽश्वस्य शावके ।३५। तैलपण्यौ

षधौ च स्यात्तरुणा नवस्य सूर्ययोः। किर्मीरो नागरंगे च कर्बुरे राक्षसांतरे।१३६। किंशारुर्नासस्यशूके विशिखे कंकपक्षिणि। कुहरं गह्वरे छिद्रे क्ली-
वं नागांतरे पुमान्।१३७। कुकुरः सारमेये ना ग्रंथिपर्णे नपुंसकं। कूर्परः स्यात्कफोणौ च जानुदेशे च पुंस्ययं।१३८। कुंजरोऽनेकपे केशे स्त्री धात-
क्यां च पाटलो। कुमारः स्याच्छुके स्कंदे युवराजेऽश्ववारके।१३९। बालके वरुणद्रौ ना नद्योर्जात्यकांचने। कुमारी शैलतनया नवमाल्योर्नदी-
भिदि।१४०। सहापराजिता कन्या जंबूद्वीपेषु च स्त्रियां। कुठरुर्ना द्रुमे कपौ कुद्दारं केवले रते।१४१। कुबेरः स्यात्पुंसि नदीवृक्षे पुण्यजनेश्वरे। कू-
वरस्त्रिषु चारौ ना कुब्जके स्त्री युगंधरे।१४२। केसरं हिंगुनि क्लीवं किंजल्के न स्त्रियां पुमान्। सिंहच्छटायां पुंनागे बकुले नागकेसरे।१४३।
केदारोऽद्रौ शिवे क्षेत्रे भूमिभेदालवालयोः। केनारः पुंसि नरके शिरःकपालसंधिषु।१४४। कोटिरः पुंसि नकुले शक्रगोपकशक्रयोः। कोटारो
नागरे कूपे पुष्करिण्याश्च पाठके।१४५। खपुरः क्रमुके भद्रमुस्तकेऽलसकेऽपि च। खर्परस्तस्करे धूर्ते भिक्षाभांडकपालयोः।१४६। खर्जूरं रूप्यख-
लयोर्वृश्चिके ना द्रुमे द्वयोः। खदिरी शाकभेदे स्त्री ना चंद्रे दंतधावने।१४७। खंडाभ्रमभ्रलेशे स्यात्तथा दंतक्षतांतरे। खिंखिरस्तु शिलाभेदे खट्वां-
गे वारिधानके।१४८। गणेरुः कर्णिकारद्रौ करिणीवेश्ययोः स्त्रियां। गर्गरो मीनभेदे स्त्री मंथन्यामथ गह्वरः।१४९। गुहागहनदंभेषु निकुंजे तु पुमा-
नयं। गांधारः पुंसि सिंदूरे रागदेशप्रभेदयोः।१५०। गायत्री त्रिपदा देवी छंदोभित्खदिरेषु च। गोपुरं द्वारि पूर्द्वारि केवर्त्तीपि च।१५१। घर्घरो ना
चलद्वारि द्वारोलूकनदांतरे। स्त्री तु घर्घरी वीणायाभेदे स्वरांतरेपि च।१५२। चमरं चामरे स्त्री तु मंजरीमृगभेदयोः। चंदिरोऽनेकपे चंद्रे चत्व-
रं स्थंडिलेऽगने।१५३। चंकुरः स्यंदने वृक्षे चातुरो नेत्रगोचरे। चाटुकारि नियंत्रोश्च त्रिषु दाक्षे तु चातुरी।१५४। चक्रगंडौ च पुंसि स्याच्चामरं चा-
मरेऽपि च। दंडे च वालव्यजने चिकुरस्तरलागयोः।१५५। पक्षिविष्टे तु भिरोः केशे गृहवभ्रौ सरीसृपे। छिद्दिरः पावके रज्जौ करवाले परश्वधे।१५६।
छिदुरश्छेदनद्रव्ये धूर्ते वैरिणि च त्रिषु। जठरो न स्त्रियां कुक्षौ बद्धकर्कटयोस्त्रिषु।१५७। जर्जरं शैवले शक्रध्वजे त्रिषु जरातुरे। जंबीरः प्र

47

मुस्तके

रामः
४७

स्यपृष्ठे स्यात्पुंसि दंतशठद्रुमे ।५८। जलेंद्रः पुंसि वरुणे जंभले च महोदधौ । झर्झरः स्यात्कलियुगे वाद्यभांडे नदांतरे ।५९। झझरी झल्लरी च वेक
लुके वालकुंतले । टंकारी स्यान्न्यग्रोधवादे लंपापटहवाद्ययोः ।६०। टंकारो विस्मये पुंसि प्रसिद्धौ धिंजिनीध्वनौ । टगरः टंकणक्षारे हेलाविभ्रम
गोचरे ।६१। नान्यवल्केकरासे स्याद्धिंगिरे ऽंगरे । पिच । स्तोपेतमिस्त्रं तिमिरं कोपे स्त्री तु तमस्तती ।६२। कुसुमपत्रनिशायां च वल्कपत्रे तु वरांगके ।
स्त्रीकारव्यां च तिमिरं ध्वांते नेत्रामयांतरे ।६३। तीवरो नां तु धौव्याधे तुवुरी कुक्कुरे स्त्रियां । धन्याके पि तुषारस्तु शीकरे शीतले हिमे ।६४। तुवर
स्तु कषाये स्यात्काश्यादक्यो स्तुवर्ज्ये पि । तूवरो ऽश्मश्रुपुरुषे शोढा श्रृंगारके पि च ।६५। तुरुष्कं जनन्यके स्यात्कषायरसे पि च । द[illegible]हरो
मूषिकायां तस्कल्पे भ्रातरि बालके ।६६। दंतुरस्तून्नतरदे तथोन्नतनते त्रिषु । दर्दरः पर्वते पुंसि त्रिषी शान्नगनभाजने ।६७। दर्दुरस्तोय
दे मेके वाद्यभांडाद्रिभेदयोः । दर्दुरा चंडिकायां स्याद्ग्रामजाले नपुंसकं ।६८। द्वारो वहले मत्तवारणे स्मरयंत्रके । कुंभकारस्य चक्रे च द्वापरः
संशये युगे ।६९। दासेरो दासिकापत्ये त्रिषु पुंसि क्रमेलके । दुर्द्धरः पुंसि नरकांतरे स्यादृषभौषधौ ।७०। देसारिः पुंसि सानान्यदेवे च गरुडध्व
जे । धूसरी किन्नरीभेदे नाखरे त्रिषु पांडुरे ।७१। नरेंद्रस्तु महीपाले विषवैद्ये च पुंस्ययं । नर्मरा तु दरी भस्त्रासरलानिष्कलासु च ।७२। नागरं
मुस्तके शुंठ्यां विदग्धे नगरोद्भवे । निकरो निवहे सारे न्याय्यदेयधने निधौ ।७३। निर्झरस्तु सहस्रांशुतुरंगे तुषपावके । निर्जरः स्यात्पुमान्देवे ज
रालक्षे च वाच्यवत् ।७४। निर्जरा तु गुडूच्यां च तालपर्ण्यामपि स्त्रियां । निकारः स्यात्परिभवे धान्यस्योत्क्षेपलेपि च ।७५। निर्दरं निर्भरे सारे
न्यवतु कठिने ऽत्रपे । स्यान्नीवरो वणिजके वास्तव्ये च पुमानयं ।७६। प्रवरः संततौ गोत्रे क्लीवं श्रेष्ठे तु वाच्यवत् । प्रखरो हयसन्नाहे कुक्कुरे ऽश्व
तरे ऽपि च ।७७। पुंसि त्रिषु त्वतितरे पवित्रं वर्षणे कुशे । तामपयसि च क्लीवं मेध्ये स्यादभिधेयवत् ।७८। प्रदरो रोगभेदे स्याद्विदारे शरभं
गयोः । प्रकरः स्यात्पुमान्संघे विकीर्णकुसुमादिषु ।७९। नपुंसकं जोंगके स्त्री नागे च लरावलौ । पंकारः शैवले सेतौ सोपाने जलकुब्जके

।१८०। प्रस्तरोऽश्मावलिमणिप्रकारस्तुल्यभेदयोः। पादारः पादधूलौ स्यात्पादालिंदे विपुंस्ययं।१८१। प्रसरः प्रणये वेगे स्यात्स्यात्पटीरस्तु मूलके। केदारे
वेणुसारे च वारिदे तितउन्यपि।१८२। स्याड्डंगे वातिके पुंसि पामरः खलनीचयोः। पांडुरं स्यान्मरुवके वर्णे नाना तद्वति त्रिषु।१८३। पार्वरो भक्तसि
क्थे स्यात्कीनाशे राजयक्ष्मणि। जरटे पिकदंबस्य केसरे च गदांतरे।१८४। प्रांतरं विपिने दूरशून्यवर्त्मनि कोटरे। पिठरः स्यात्स्थाल्यां ना क्लीबं मु
स्तामंथानदंडयोः।१८५। पिंजरोऽश्वांतरे क्लीबं स्वर्णे पीते च वाच्यवत्। पिंडारः क्षपणे गोपे महिषीरक्षके द्रुमे।१८६। पीवरः कच्छपे स्थूले पुष्क
रं खेंऽबुपद्मयोः। तूर्यवक्रे खङ्गफले हलिहलाग्रकांडयोः।१८७। कुष्ठौषधे द्वीपतीर्थभेदयोः स्त्री नपुंसकं। नारोगनागविहगनृपभेदेषु वा
रुणे।१८८। वंठरः स्याद्गिकारज्जौ लांगुले कुक्कुरस्य च। करीरः कोषे तालस्य पल्लवे च पयोधरे।१८९। वंधुरं मुकुटे पुंसि स्त्री चंगतैलकल्क
योः। वंधूके वधिरे हंसे त्रिषु स्यादुन्नतनम्रयोः।१९०। वंधुरा पण्ययोषायां स्त्रियां भूम्नि वसक्तुषु। वंधुरः शोभने नम्रे वर्वरा रुग्णकन्तयोः।१
९१। भ्रमरः कामुके भृंगे भ्रामरं मधुनिस्सृतं। पुंसि प्रस्तरभेदेऽथ भास्करोऽग्नौ प्रभाकरे।१९२। भार्यारुः शैलभेदे स्यान्मृगभेदे तंत्र च। क्लीउमा
परभार्यायां पुत्रो येनोपपादितः।१९३। भृंगारी झिल्लिकायां स्याल्कनकालौ पुनः पुमान्। मत्सरो मक्षिकायां स्यान्मात्सर्ये क्रोधयोः पुमान्।१९४।
असह्यपरसंपत्तौ कृपणे चाभिधेयवत्। मधुरा शतपुष्पायां मिश्रेयानगरीभिदोः।१९५। मधुकर्कटिको मेदा मधूलीयष्टिकासु च। क्लीबं
विषे पुंसि रसे तद्वत्स्वादुप्रियेऽन्यवत्।१९६। मंदरस्तु पुमान्मेरुशैले मंदारपादपे। वाच्यवद्बहले मंदे मंदारः स्यात्सुरद्रुमे।१९७। पारिभद्रेऽर्क
पर्णे च मंदारो हस्तिधूर्त्तयोः। मंदिरं नगरेऽगारे क्लीबं ना मकरालये।१९८। मंथरः कोषफलयोर्वाधमंथानयोः पुमान्। कुसुंभांतद्वयोर्मन्दे
पृष्ठो वक्रेऽभिधेयवत्।१९९। मकरो यादसां भेदे निधिराशिप्रभेदयोः। मयूरो वर्हिचूडायामपामार्गे शिखंडिनि।२००। महेंद्रः पर्वते शक्रे म
धुद्रोऽलौ च कामुके। मंदुरा वाजिशालायां शयनीयार्थवस्तुनि।२०१। मसूरा मसुरा वा ना वेश्या व्रीहिप्रभेदयोः। मसूरी पापरोगे स्यादुपधा

च

ह

रामः
५८

48

ने पुनः पुमान्॥ २०२॥ मर्मरो वस्त्रभेदे च शुष्कपर्णध्वनौ तथा। पुंसि स्त्रियां पुनः प्रोक्ता मर्मरी पीतदारुणि॥ २०३॥ मंजरी तिलकद्रुमुक्तयो
र्वल्लरीरोधयोः॥ मकुरः स्यान्मुकुरवद्दर्पणे बकुलद्रुमे॥ २०४॥ कुलालदंडे माठरो व्यासे ऽर्कपारिपार्श्विके। मार्जारओतौ खट्टाशे मिहिरः सूर्य्यवृद्ध
योः॥ २०५॥ मुकुरं मल्लिकाभेदे पुंसि लोष्ठादिभेदने। मुद्गरः कामुके मेघे मुहिरः काममूर्खयोः॥ २०६॥ मुर्मुरस्तुषवह्नौ स्यान्मन्मथे रविवाजिनि।
मृगारिः स्यात्पुंसि कंठीरवशार्दूलयोरपि॥ २०७॥ रुधिरो ऽङ्गारके पुंसि क्लीबं तु कुंकुमासृजोः। बदरा गृष्टिकार्पास्योरेलापर्ण्यां स्त्रियां पुमान्॥ २०८
॥ कार्पासस्यास्थ्नि बदरी कोलो क्लीबं तु तत्फले। वचरः कुक्कुटे पुंसि शठे च वशिरः पुमान्॥ २०९॥ किणिही हस्तिपिप्पल्योः क्लीबे ऽब्धिलवणे ऽस्त्य
तः। वर्बरः पामरे केशे चक्कल्ले नीवृदंतरे॥ २१०॥ फंजिकायां पुमान् शाकभेदे पुष्पविदोः स्त्रियां। वर्करः परिहासे स्यात् छागे युववशावपि॥ २११॥ व
ल्लुरं शाद्वलच्छन्ने गहनौषधयोरपि। वल्लूरं त्रिषु संशुष्कमांसशूकरमांसयोः॥ २१२॥ वार्दरं कृसला लावीजदक्षिणावर्त्तशंखयोः॥ वीरे च काक
चिंचायां भारत्यां च नपुंसकं॥ २१३॥ वागरः स्तक गतातंके मुमुक्षौ वातवेष्टके। विशारदे विषालेपि निर्णये वारके पि च॥ २१४॥ वासरस्तु पुमान्नाग
भेदे दिनयोरपि। वासुरा वासितायां स्यात् वासतेयमुवि स्त्रियां॥ २१५॥ विष्टरः कुशमुष्टौ स्यादासने पि महीरुहे। विस्तरो वाक्यप्रपंचे स्यात् विस्ता
रे प्रणये पि च॥ २१६॥ विदुरो नागरे धीरे कौरवाणां च मंत्रिणि। विधुरं स्यात् प्रविश्लेषे न द्वयोर्विकले त्रिषु॥ २१७॥ रसालायां स्त्री विदारो जललो
च्छ्वासो ऽजिदारणे। विदारी शालपर्ण्यां च रोगभेदे तु गंधयोः॥ २१८॥ विवरं दूषणे गर्त्ते विसरः प्रसरे व्रजे। विस्तारो विस्तृतौ स्तंबे विकारो विकृ
तौ रुजि॥ २१९॥ विहारो भ्रमणे स्कंधे लीलायां सुगतालये। प्रावरो म्लेच्छभेदे स्यात् च पानीये शंकरे पि च॥ २२०॥ शंवरं सलिले पुंसि मृगदैत्यवि
शेषयोः। शंवरी खाखुपर्ण्यां स्यात् शर्वरी यामिनी स्त्रियोः॥ २२१॥ शर्करा खंडविकृतावुपला कर्परांशयोः। शर्करान्वितदेशे पि रुग्भेदे शाक
ले पि च॥ २२२॥ शाक्करी छंदसो भेदे नदी मेखलयोरपि। शारीरं श्रोणमध्यस्थे पुलिने दर्दरीतटे॥ २२३॥ श्वभ्ररः स्रुजे ऽस्त्री ब्राह्म्यां शारीरं देह

जेहवे। शार्ङ्कारः स्याद्दुग्धफेने शाकेराग्विते देशयोः ।२२४। शाकरस्तु वलीवर्दे ष्वंडे भेदे नपुंसकं। शार्वरं त्वंधतमसे घातुके भेद्यलिंगकं ।२२५। शालारं
स्याद्धस्तिनखे सोपाने पक्षिपंजरे। शार्वरी क्षकाशिंर्यां स्यात्पुंसि पापापराधयोः ।२२६। लोध्रे च पंकारिः पुंसि कार्त्तिकेये गणाधिपे। शिखरोऽ(
स्त्री द्रुमाग्राद्रिशृंगे पुलककक्षयोः ।२२७। पक्कदाडिमबीजाभमाणिक्यशकलाग्रयोः। शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु ।२२८। शिलीध्रं
कदलीपुष्पे करके ना तु रुषांतरे। द्रुमभेदे स्त्री तु विहंगीभेदगंडूपदीभिदोः ।२२९। शीकरं शरले वाते सत्तांबुकणयोः पुमान्। शुषिरं वंशादिवा
द्ये विवरेपि नपुंसकं ।२३०। मूषिके ना स्त्रियां गर्त्ते वह्नौ रंध्रान्विते त्रिषु। शृंगारः सुरते नाट्यरसे च गजमंडने ।२३१। नपुंसके लवंगेपि नागसं
भवचूर्णयोः। संवरो दैत्यहरिणमत्स्यशैलजिनांतरे ।२३२। नपुंसकं तु सलिले बौद्धव्रतविशेषयोः। संकारोऽग्निचटत्कारे समाजेन्तवपुं
जिते ।२३३। नवदूषितमकन्यायां संकारी पुनरुच्यते। संस्कारः प्रतियत्नेऽनुभवे मानसकर्मणि ।२३४। संस्तरः प्रस्तरे यज्ञे संगरो युधि(
चापदि। क्रियाकारे विषे चांगीकारे क्लीबं शमीफले ।२३५। संभारः संभृतौ संघे सामुद्रं देहलक्षणे। समुद्रजेऽन्यलिंगोऽथ सावित्रः संक
रे वसौ ।२३६। सावित्री सत्यवत्पत्न्यां ब्रह्मपत्न्युमयोरपि। सिंदूरस्तरुभेदे स्यात् सिंदूरं रक्तचूर्णके ।२३७। सिंदूरी रोचनी रक्तचेलिकाधा
तकीषु च। सुनारस्तु शुनीस्तन्ये सर्पांडकलविंकयोः ।२३८। सुंदरी तरुभिन्नारीभिदोः स्त्री रुचिरेऽन्यवत्। सैरिंध्री परवेश्मस्थशिल्प
कृत्स्ववशास्त्रियां ।२३९। बलिसंकरसंभूतस्त्रीमहल्लिकयोरपि। सौवीरं कांजिके स्रोतोंजने च बदरीफले ।२४०। नाशुनीहतिहारिदंहरिद्रा
रंजिते त्रिषु। नानीपवृक्षे हिंडीरः फेनवार्त्ताकुपूरुषे ।२४१। ।रचतुः।। अरुष्करो व्रणकृति त्रिषु भल्लातके पुमान्। भवेदभिमरो युद्धे वधे
स्वबलसाधने ।२४२। अनुत्तरं [illegible] त्रिषु श्रेष्ठे प्रतिजल्पविवर्जिते। अलंकारस्तु हारादावुपमादावलंकृतौ ।२४३। अवहारः पुमान् ग्राहे चौरे द्यूत
मुद्धादिविश्रमे। निमंत्रणोपनेतव्यद्व्येषाहास्वपयादसि ।२४४। अवतारोऽवतरणे पुष्करिण्यादितीर्थयोः। अवस्करोऽपि वर्चस्के गुह्ये ष्पा

वत्सरः पुमान्॥२४५॥ प्रस्तावो मंत्रभेदे च वर्णने चापि कीर्तितः। उपल्लास्यादकूपारः कूर्मराजे महोदधौ॥२४६॥ असिपत्रः खड्गकोषे पुमानि-
रौ च नारके॥ भवेदश्वतरो वेगसरे नागांतरेऽपि च॥२४७॥ अभिहारोऽभियोगे च चौर्ये सन्नहनेऽपि च॥ अग्निहोत्रोऽग्निहविषोरर्द्धचंद्रो नखक्ष-
ते॥२४८॥ गलहस्ते बाणभेदे कुस्मवृतिस्तु स्त्रियां॥ आडंबरस्तूर्यरवे संरंभे गजगर्जिते॥२४९॥ आत्मवीरः प्राणवति स्यालके च विदू-
षके॥ इंदीवरं कुवलये शतावर्यां तु योषिति॥२५०॥ उदुंबरस्तु देहल्यां स्याद्धृदांभेदे च पंडके॥ कुष्ठभेदेऽपि च पुमान् ताम्रे तु स्यान्नपुंसकं॥२५१॥ उप-
कूरं समीपे स्यादेकांतेऽपि नपुंसकं॥ उदंतुरस्त्रिषूत्तुंगे करालोत्कटदंतयोः॥२५२॥ उपकारस्त्वोपकृतौ विकीर्णे कुसुमादिषु॥ उदुंबरः
स्यादुदेवे रोगभेदे नपुंसकं॥२५३॥ अथ कर्मकरो भृत्ये सेवेतनाजीवनि त्रिषु॥ कीनाशे पुंसि मूर्वायां विंविकायामपि स्त्रियां॥२५४॥ कलिका-
रस्तु धूम्याटे करंजे पीतमस्तके॥ कर्णिकारः पुमानारग्वधद्रौ च द्रुमोत्पले॥२५५॥ कर्णपूरः शिरीषे स्यान्नीलोत्पलवतंसयोः॥ करवीरः कृ-
पाणे स्याद्दैत्यभेदाश्वमारयोः॥२५६॥ करवीर्यदितिश्रेष्ठगवीपुत्रवतीषु च॥ कंटभरप्रसारण्यां रोहिण्यां गजयोषिति॥२५७॥ कलंविका-
यां गोलायां वर्षाभूमूर्वयोरपि॥ कादंबरस्तु दध्यग्रे मद्यभेदे नपुंसकं॥२५८॥ स्त्री वारुणीपरभृता भारती शारिकासु च॥ कालंजरो योगि-
चक्रमेलके भैरवे गिरौ॥२५९॥ कुंभकारी कुलत्थ्यां च पुल्लिंगो घटकारके॥ कृष्णसारः शिंशपायां पुंसि तु सारंगांतरे॥२६०॥ गिरिसारः
पुमान् लोहे रंगे मलयपर्वते॥ घनसारस्तु कर्पूरे दक्षिणावर्तपारदे॥२६१॥ चराचरं वाच्यलिंगं जंगमे जगति न द्वयोः॥ चर्मकारः पादुकाकृति-
स्त्रियां चर्मकषौषधौ॥२६२॥ अथ पत्रकं धरेऽजेऽहौ नात्रिषु ग्रामजालिनि॥ चित्राटीरो विधौ मालमंडिते येन तत्र च॥२६३॥ घंटाकर्णो महा-
रायहतात्र्छागास्त्रविंदुषु॥ तालपत्रं तु ताटंके रंदुर्यां तालपत्र्यपि॥२६४॥ तुंगभद्रा नदीभेदे स्त्रियां पुंसि मदोत्कटे॥ तुंडिकेरी तु कर्पासी-
विंविकायामपि स्त्रियां॥२६५॥ तुलाधारस्तुलाराशौ पुंसि वाणिजके त्रिषु॥ अथ तोयधरो मुस्तामुनिषण्णौषधीघने॥२६६॥ दंडयात्रा दिग्वि-
जये संपानवरयात्रयोः॥ अथोदरपुरंदरे शक्रे पिस्यान्नपुंसकं॥२६७॥ दंधौउरः पुमान् स्थ्पीनाथे प्रेताधिपे पि च॥ दिगंबरः स्यात्क्षपणे

का

नग्नेतमसि म्रां करे ॥२६८॥ दुरोदरं द्यूतभेदे द्यूतकृत्पणयोः पुमान् । देहयात्रा यमपुरीगमने भोजनेपि च ॥२६९॥ द्वैमातुरो जरासंधवारणाननयोः पुमा
न् । धराधरो हरौ शैले धाराधरोसिमेघयोः ॥२७०॥ धराङ्कुरस्तु नाम्भोरे शीकरेऽपि घनोपले । धार्त्तराष्ट्रोऽसितास्यांघ्रिहंसे कौरवसर्पयोः ॥२७१॥ धु
न्धुमारो शक्रगोपे गृहधूमे पदालिके । धुरंधरो धववृक्षे ना वाच्यलिंगस्तु धूर्वहे ॥२७२॥ धृतराष्ट्रः सुराज्ञि स्यान्नागहंसप्रियभेदयोः । धृतराष्ट्री
हंसपत्न्यां नभश्चरो विहंगमे ॥२७३॥ विद्याधरे घने वाते निशाचरस्तु रक्षसि । फेरुपेचकसर्पेषु पांशुलायां निशाचरी ॥२७४॥ निषद्वरस्तु जंबाले
निशायां तु निषद्वरा । नीलांबरः प्रलंबघ्ने कौणपे च शनैश्चरे ॥२७५॥ भवेत्परिकरः संघे पर्यंकपरिवारयोः । प्रगाढगात्रिकाबंधे समाचारवि
वेकयोः ॥२७६॥ प्रष्ठपद्मचरश्चन्द्रे पृष्ठकृच्चाद्रिगजेपि च । भवेत्प्रतिसरो मंत्रभेदे माल्ये च कंकणे ॥२७७॥ व्रणशुद्धौ च मूढे पुंसि सैन्ये तु मं
डने । आरक्षे करसूत्रे च नियोज्ये त्वन्यलिंगकः ॥२७८॥ भवेत्परिसरो मृत्यौ विधावपि च पुंस्ययं । परंपरो मृगभेदे प्रपौत्रे तनयस्य चा ॥२
७९॥ पुं परप परिपाट्यां हिंसासंतानयोरपि । पयोधरः कोषकारे नारिकेले स्तनेपि च ॥२८०॥ कसेरुमेघयोः पुंसि प्रभाकरोऽग्निसूर्ययोः ।
प्रतीहारो द्वारि द्वाःस्थे द्वाःस्थितायां तु योषिति ॥२८१॥ परिवारः परिजने खड्गकोषे परिच्छदे । पारावारः समुद्रे ना तटद्वये नपुंसकं ॥२८२॥ पा
रटीरस्तु पुल्लिंगो मुक्तव्यापारमंत्रिणि । लोहकांस्यरजतपात्रे सिंघाणे पावकेऽपि च ॥२८३॥ पारिभद्रस्तु मंदारे निंबद्रौ देवदारुणि । पीतांब
रस्तु शैलूषे पुंसि कैटभसूदने ॥२८४॥ पीतसारो मलयजे गोमेदके मणावपि । पूर्णपात्रं वस्तुपूर्णपात्रे वर्द्धापकेपि च ॥२८५॥ बलभद्रा त्राय
माणाकुमार्योः पुंसि सीरिणि । ब्रह्मपुत्रः क्षेत्रभेदे नदभेदे च पुंस्ययं ॥२८६॥ बकनक्रस्तु पिशुने नासायक्वकपक्षिणि । वार्द्धरोरंगश्रीस्त्रा
स्यां कुरंगणिकासुते ॥२८७॥ बारकीरस्तु पुंसि स्याद् द्वारग्राहिणि वाडवे । यूकायां लेलरो धिन्वा नीराजितहयेऽपि च ॥२८८॥ बिंदुतंत्रः पुमा
न् शारिफलके चतुरं[illegible]गके । वीरभद्रोऽश्वमेधाश्वे वीरश्रेष्ठे च वीरणे ॥२८९॥ स्त्री स्याद्वीरतरं वीरणे वीरश्रेष्ठे भावे च ना । महावीरस्तु
गरुडे शूरे सिंहे महास्वानले ॥२९०॥ वज्रे श्वेततुरंगे च संचानविहगेऽपि च । महामात्रः समृद्धे चामात्ये हस्तिपकाधिपे ॥२९१॥ मणिछिद्रा तु

५०

ए म: ५०

मेदायामृषभाख्यौषधेपि च। महेश्वरो महादेवे कथितो धीश्वरेऽपि च।२९२। मृगनेत्रा रात्रिभेदे विशेषेयोषितस्तथा। रथकोरस्तु माहि
ष्या त्करणीजे च तक्षणि।२९३। रामसूत्रं तु लासूत्रे पट्टसूत्रे नपुंसकं। लंबोदरः स्याद्गुन्दाने गणनामधेयेऽपि हि।२९४। लक्ष्मीपुत्रस्तु
पुंल्लिंगः कामदेवे तुरंगमे। व्यवहारो द्रुमेदे स्यान्न्यासे पिवगणस्थितौ।२९५। अथ व्यतिकरः पुंसि व्यसनव्यतिषंगयोः। वातपुत्रो महाधूर्ते
भीमसेने हनूमति।२९६। विश्वंभरोऽच्युते शक्रे पुंसि विश्वंभरा भुवि। विश्वकद्रुस्त्रिषु खले ध्वानाखेटश्वनोः पुमान्।२९७। विभावरी निशा
याण्योः कुट्टन्यां वक्रयोषिति। विवादवल्गुयुग्यां च विभाकरोऽग्निसूर्ययोः।२९८। वीतिहोत्रोऽनलेऽर्के च शतपत्रः शिखंडिनि। दार्वीघाटे सा
रसे च कमले तु नपुंसकं।२९९। शतावरी तु शच्यां स्याद्धिंदीवर्यामपि स्त्रियां। शिशुमारो तु सम्भूतजंतौ तारालकोऽच्युते।३००। भवेत्सहचरो
झिंट्यां द्वयोरनुचरे त्रिषु। समुद्रारुः पुमान् ग्राहे सेतुबंधे तिमिंगिले।३०१। संप्रहारो गतौ युद्धे स्थिरदंष्ट्रो भुजंगमे। वाराहालेतिविख्योवसुर
कुमारो मदे त्रिषु।३०२। पुंसि पुंड्राभिधाने स्तौ सूत्रधारः शचीपतौ। नानौंयं तरसे चारिपारिपार्श्वभेदयोः।३०३। रपंचात्तमालपत्रं ता
पिंछे तिलके पत्रकेऽपि च। तालीशपत्रे भूम्यामलकीतालीशयोः स्मृतं।३०४। स्यात्तोमश्चामरः पुंसि दूर्वाचितनटीभुवि। वर्ह्यापके प्रशं
सण्यां पुरोटो धूलिगुच्छके।३०५। सालादचतुरश्र्याग्रे सेकते पिप्पले पि च। आकरके पादोषे कमवत्स पुरुषेऽपि च।३०६। पीतकावेरमिसे
तौ कुंकुमे पित्तलेऽपि च। स्याद्बृजवृंदरं रक्तमेलके लवणेऽपि च।३०७। वस्तोकसारेंदुपुरे कुवेरनलिनीपुरोः। विप्रतीसारडद्दिष्टः कौ
कृत्येऽनुशये रुषि।३०८। भवेत्समभिहारस्तु पौनःपुन्यभृशार्थयोः। सवितो भद्रकस्तु मतः कांचित्रेगरुहांतरे।३०९। निर्वेना सर्वतो
भद्रांगं भारीनद्योर्वितोः॥ ॥इति रांतवर्गः॥ ॥लैकम्॥ लः एके लातु दाने स्याज्जुहलेपि निगद्यते। लीश्लेषणे च चबले ग्लौर
धरणपानिशापतौ।१। लद्विः। ॥अम्लो रसस्य भेदे स्यादम्ली चांगेरिकौषधौ। अलिः सुरापुष्पलिहोः पुंसालिर्विशदाशये।२। त्रिषु

स्त्रियां वयस्यायां सेतौ पंक्तौ च कीर्तिता । आलुर्गलन्तिकायां स्त्री वं मूले च मेलके ॥ १३ ॥ इला कलत्रे सौम्यस्य धरित्र्यां गवि वाचि च । ओह्लस्तु सूरणे
पुंसि स्यादार्द्रवाच्यलिंगकः ॥ १४ ॥ कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चंद्रस्य कलनाकालमानयोः ॥ १५ ॥ कलं शुक्रे त्रिष्वजी
र्णनाद्योऽक्तमधुरध्वनौ । कलिः स्त्री कलिकायां ना शूरेऽऽजिकलहे युगे ॥ १६ ॥ कालो मृत्यौ महाकाले समये यमकृष्णयोः । काला तु कृष्णत्रिवृतामंजि
ष्ठानीलिकासु च ॥ १७ ॥ काली गौर्य्यां क्षीरकीटे कालिका मातृभेदयोः । कीलो लेशे द्वयोः शस्त्रज्वालाकफोणिशंकुषु । कुलं जनपदे गोत्रे सजातीय
गणेऽपि च । भवने च तनौ क्लीबं कंटकार्य्यां वधे कुली । अथ कूलं तटे स्तूपे सैन्यपृष्ठे तडागयोः । कोलं कोलिफले क्लीबे पिप्पलीचव्ययोः स्त्रियां ॥ १८
नौ कपाले शनौ चित्रे वराहोत्संगमेलके । खलं भूस्थानकल्केषु नीचक्रूराधमे त्रिषु ॥ १९ ॥ खल्लो वस्त्रप्रभेदे स्यान्निम्ने चर्मणि चातके । खल्ली तु हस्तपा
दावमर्द्दनाख्यरुजि स्त्रियां ॥ २० ॥ खिलमप्रहते क्लीबं सारसंक्षिप्तवेधसोः । गलः सर्जरसे कंठे गुलः स्यादैक्षवे पुमान् ॥ २१ ॥ गुली तु गुटिकारोगभिदोः
स्नुह्यां गुला स्मृता । गोला गोदावरीसख्योः कुनटीदुर्गयोः स्त्रियां ॥ २२ ॥ पत्रांजने मंडले चाऽलिंजरे वालखेलने । चलो लक्ष्म्यां पुमान् कंपे कंपयुक्ते
ऽभिधेयवत् ॥ २३ ॥ चिल्लः पुमान् क्लिन्ननेत्रे क्लिन्नाक्षेऽप्यभिधेयवत् । आततायिनि तद्भोक्तः चिल्ली स्यात्तु द्ववास्तुके ॥ २४ ॥ चुल्ली चितायामु
द्धाने चोलः कूर्पासके पुमान् । नपुंसके तु वसने छलं स्खलितशाठ्ययोः ॥ २५ ॥ छल्ली वीरुधि संताने वल्कले कुसुमांतरे । जलं गोकलने नीरे ह्रीवे
रेऽप्यन्यवज्जडे ॥ २६ ॥ जालं गवाक्ष आनाये क्षारके दंभवृंदयोः । जाला नीपद्रुमे जाली पटोली कोषधौ स्त्रियां ॥ २७ ॥ झल्ला स्यादातपस्तोमेर्द्दहित
र्य्यांपि च स्त्रियां । झिल्ली चीर्य्यातपरुचोर्वर्त्ती समुद्वर्त्तनांशुके ॥ २८ ॥ तलं स्वरूपेऽनूर्द्धे स्त्री क्लीबं ज्याघातवारणे । कानने काचे वीर्ये च पुंसि ता
लमहीरुहे ॥ २९ ॥ चपेटे च त्सरौ तेत्री घाते सव्येन पाणिना । तल्ली तरुण्यां तल्लस्तु जलाधारांतरे पुमान् ॥ ३० ॥ तालः करतलेंगुष्ठमध्यमा
भ्यां च संमिते । गीतकालक्रियामाने करास्फाले द्रुमांतरे ॥ ३१ ॥ वाद्यभांडे च कांस्यस्य त्सरौ ताली जटौषधौ । क्लीबं तु हरिताले स्यात्तुला सा
दृश्यमानयोः ॥ ३२ ॥ गृहाणां दारुबंधाय पीठिकायामपीष्यते । राशौ पलशते भांडे तुलं स्याद्दृश्यदारुणि ॥ ३३ ॥ आकाशेऽप्यपि चोनस्त्रीदल

पुत्से धरखंडयोः। शस्त्री छुरेप्यवद्धव्ये पत्रेप्यथ दुलिः स्त्रियां।२६। कमठ्यां नामुनौ दोला नील्यां यानांतरे पि च। नलः पोटगले राज्ञि पितृदेवे कपीश्व
रे।२७। कमलेऽपि कुनट्यां च क्रमेण क्लीबयोषितोः। नाला नना पद्मादंडे नाली शाककडंबके।२८। नीलं तु नीलीरक्ते ना निध्यद्रिवानरांतरे। नीली रु
भेद नीलिन्योः पलमुन्मानमांसयोः।२९। पल्लस्यल्पग्रामकुट्योः पल्लिः स्थूलकुसूलके। पालिः कर्णलताग्रेऽश्र्यौ पंक्तावंकप्रभेदयोः।३०। छात्रा
दिदेये स्त्री पालीयूकासश्मश्रुयोषितोः। पिल्लः पुमान् क्लिन्ननेत्रे क्लिन्नाक्षे पुनरन्यवत्।३१। पीलुः पुमान् प्रसूने स्यात्परमाणौ मतंगजे। अस्थि
खंडे च तालस्य कांडपादप्रभेदयोः।३२। पुलः स्यात्पुलके पुंसि विपुलेप्यन्यलिंगकः। फलं जातीफले सस्ये हेतूत्थे व्युष्टिलाभयोः।३३। त्रिफला
यां च कक्कोले त्रियं गौ तु फली स्मृता। फालः पुंसि महादेवे कालिंदीभेदनेऽपि च।३४। क्लीबं सीरापकरणे त्रिषु कर्पासवाससि। वलिर्दैत्यप्र
भेदे च करचामरदंडयोः।३५। उपहारे पुमान् स्त्री तु जरयाश्लथचर्मणि। गृहदारुप्रभेदे च जठरावयवेऽपि च।३६। वलं गंधरसे रूपे स्थामर
निस्थौल्यसैन्ययोः। पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च।३७। वलयुक्तेऽन्यलिंगः स्यात् वाट्यालके तु योषिति। वल्ली स्यादजमोदायां व्र
तत्यामपि योषिति।३८। वालो ना कुंतलेऽश्वस्य करिणश्चापि वालधौ। नारिकेले हरिद्रायां मल्लिकापि च स्त्रियां।३९। वाच्यलिंगोऽर्भ
के मूर्खे क्लीबेरे तु नपुंसकं। अलंकारांतरे मध्ये वाली वालात्रुटिस्त्रियोः।४०। वेला काले च सीमायामब्धेः कूलविकारयोः। अक्लिष्टमरणे
रागे ईश्वरस्य च भोजने।४१। भल्लः स्यात्पुंसि भल्लूके शस्त्रभेदे तु न द्वयोः। भल्लातक्यां स्त्रियां भल्ली भालं तेजोललाटयोः।४२। भेलः प्लवे
मुनौ पुंसि भीरौ बुद्धे च वाच्यवत्। मलोऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवत्।४३। मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि। मालः क्षेत्रे स्त्रि
यां टकास्त्रजो जात्यंतरे पुमान्।४४। मालुः पत्रलतानार्योः स्त्रियां मूलं शिफाद्ययोः। मूलविर्त्तेऽतिके वा ना मेला स्यान्मेलके मसौ।४५। मौ
लिः किरीटे धम्मिल्ले चूडायामनपुंसकं। नाऽशोकद्रौ स्त्रियां भूमौ लीला केलिविलासयोः।४६। शृंगारभावजचेष्टायां लोलः स्याद्वाच्यलिंग
कः। सतृष्णे च चले लोला जिह्वाकमलयोः स्त्रियां।४७। व्यालो दुष्टगजे सर्पे श्वापदे नान्यवत्खले। विलं छिद्रगुहायां च पुमांस्तूच्चैःश्रवोहये।४८।

52

शलस्तु शल्ले पुंसि भं गि त्रित्रिभिदोर्विधौ। शालुः कषायद्रव्ये स्याच्चौरकाख्यौषधौ पुमान्॥४९॥ शालिस्तु कलमादौ च गंधमार्जारके पुमान्। शाला
द्रुमस्कंधशाखायां गृहगेहैकदेशयोः॥५०॥ नारुबेशिलमुंछे स्याद् ऊंडूपद्यां शिलीमता। स्तंभशीर्षे शिला शिल्पौ शिला तु प्रस्तरे मता॥५१॥ तथा
मनःशिलायां च द्वाराधःस्थितदारुणि॥ शीलस्वभावे सद्वृत्ते शुक्लो योगांतरे सिते॥५२॥ नपुंसके तु रजते शूलो ऽस्त्री रोगआयुधे। मृत्युकेतन
योगेषु शूला स्यात्सरणयोषिति॥५३॥ शैलो भूभृति शैलं तु शैलेये तार्क्ष्यशैलके। सालः पादपमात्रे स्यात्प्राकारे सर्जपादपे॥५४॥ स्यालं भाज
नभेदे ऽपि स्याली स्यात्स्यालस्ययोः॥ स्थूलं कूटे ऽप्यनिष्पन्ने पीवरे ऽप्यन्यलिंगकः॥५५॥ हालो हले पुमान् हाला मदिरायां च योषिति॥ हेला त्रि
यामदवत्तयां विलासे वरयोषितां॥५६॥ लत्रिः॥ अनलो वसुभेदे ऽग्नावनिलो वसुवातयोः॥ अर्गला त्रिषु कल्लोले दंडे ऽंतरकपाटयोः॥५
७॥ अरालः कुटिले सर्जरसे समदहंतिनि। अंगुली करशाखायां कर्णिकायां गजस्य च॥५८॥ अचला वसुधायां स्याद् अचलः शैलकीलयोः।
अमलं त्वभ्रके क्लीबं लक्ष्म्यां स्त्री निर्मले त्रिषु॥५९॥ अंजलिस्तु पुमान् हस्तसंपुटे कुडवे ऽपि च। अवेलस्त्वपलापे स्याद् वेला शृगचर्विते॥६०
॥ अभीलं न द्वयोः कृच्छ्रे वाच्यलिंगं भयानके। इल्वला तारकाभेदे ना भेदे दैत्यमत्स्ययोः॥६१॥ उत्पली तुषचर्पट्यां क्लीबं कुष्ठप्रसूनयोः। उ
पलः प्रस्तरे रत्ने शर्करायां तु योषिति॥६२॥ उज्ज्वलो दीप्तशृंगारविशदेषु विकासिनि॥ उत्फुल्लं करणे स्त्रीणामुत्ताने ऽपि विकस्वरे॥६
३॥ उत्तालमुत्कटे श्रेष्ठे विकराले त्ववेगमे। कमलं सलिले ताम्रे जलजे क्लोम्नि भेषजे॥६४॥ मृगभेदे तु कमलः कमला श्री वरस्त्रि
योः॥ कपिला रेणुकायां च शिंशपागोविशेषयोः॥६५॥ पुंडरीककरिण्यां स्त्री वर्णभेदे ऽन्यलिंगकः। ना ऽनले वासुदेवे च मुनिभेदे च कुक्कुरे॥
६६॥ कंबलो नागराजे स्यात् सास्नाप्रावारयोरपि। कृमावप्युत्तरासंगे सलिले तु नपुंसकं॥६७॥ करालो दंतुरे तुंगे भीषणे वाभिधेयवत्॥
ससर्जरसतैले ना क्लीबं कृष्णकुठेरके॥६८॥ कंदलं त्रिषु कपाले ऽप्युपरागे नवांकुरे। कलध्वनौ कंदली तु मृगगुल्मभभेदयोः॥६९॥ कद
ला कंदलो ऽस्त्र्यां कदली कदलो पुनः॥ रंभावृक्षे ऽथ कदलीपताकामृगभेदयोः॥७०॥ कदला डिंडिविकायां च शाल्मलीभूरुहे ऽपि च॥ क

रामः
५२

त्रिलिंगकं ४

पालो ऽस्त्री शिरोऽस्थ्नि स्याद् घटादेः शकले व्रजे ।७१। कंठीला तु द्वयोर्द्रोण्यां भेदे नाक्रमेलके । कल्लोलः पुंसि हर्षे स्यादुल्लोले वैरिणि
रवि ।७२। कामला रोगभेदे वा नाना मरुवसंतयोः । कामुके वाच्यलिंगो ऽथ काकोलं नरकांतरे ।७३। नाकुलाले द्रोणकाके विषभेदे तु नस्त्रि
यां । काहला वाद्यभांडस्य भेदे चाप्सरसां भिदि ।७४। काहली तु तरुण्यां स्यात् काहलश्चारणे युधे । शब्दमात्रे ऽपि पुल्लिंगस्त्रिषु शुष्के ऽतिशे ख
ले ।७५। किट्टालः पुंसि ताम्रस्य कलसे लोहगूथके । कीलालं रुधिरे तोये कुशलः शिक्षिते त्रिषु ।७६। क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसक
कं । कुवलं चोत्पले मुक्ताफले ऽपि वदरीफले ।७७। कुड्मलो मुकुले पुंसि नद्वयोर्नरकांतरे । कुटिला तगरपादयां स्त्री भुग्ने वाच्यलिंगकः ।७
८। कुंतलश्चषके वाले जवे पुंभूम्नि नीवृति । कुलालः कुक्कुभे कुंभकारे स्त्री तं जनांतरे ।७९। कुंभिलः शालमीने च चोरे श्लोकार्थचौरयोः । कु
द्दालः स्यात्पुमान् भूमिदारणे युगपात्रके ।८०। कुचेला विद्धपर्ण्यां स्त्री वाच्यवत्तु कुवाससि । कुकूलं शंकुसंकीर्णश्वभ्रे ना तु तुषानले ।८१।
कुंडलं कर्णभूषायां पाशे ऽपि वलये ऽपि च । कांचनकुगुडूच्योः स्त्री केवलः कुहने पुमान् ।८२। नपुंसकं तु निर्णीते वाच्यवच्चैककृत्स्नयोः । केर
ली तानभेदे ऽथ कोमलं मृदुले जले ।८३। कोहलो वाद्यभेदे स्यान्नाट्यशास्त्रप्रवर्तके रि । ग्रंथिलस्तु करीरद्रौ विकंकततरौ पुमान् ।८४। संग्र
थो त्रिषु गंधोली भद्राशट्योश्च योषिति । गरलं तृणपूले च विषमाने नपुंसकं ।८५। गोपालो नृपगोपे च शंगो गोकुले मुशले हले । गोरिलस्तु पु
मान् हैमीं हचूर्णे स्यात् गौरसर्षपे ।८६। चपलः पारदे मीने चोरके प्रस्तरांतरे । चपला कमला विद्युत्पुंश्चली पिप्पलीषु च ।८७। नपुंसकं तु शीघ्रे
स्याद्वाच्यवत्तरले चले । चत्वालो होमकुंडे स्यात् पुंसि दर्भे ऽपि हृष्पते ।८८। चंडिलः पुंसि वास्तूकशाके भर्गे च नापिते । चंचला तु तडिल्लक्ष्म्योः
श्च चलः कामुके ऽनिले ।८९। चूडाला तूच्चटायां स्त्री चूडावति च वाच्यवत् । छगलं नीलवस्त्रे ना छागे स्त्री वृद्धदारके ।९०। जंबालः शैवले पंके ज
गलो मदने द्रुमे । भेदके पिशितमद्ये च पुंसि धूर्ते ऽभिधेयवत् ।९१। जटिला पिप्पली मांसी जटायुक्ते तु वाच्यवत् । जंगलं निर्जनस्थाने त्रिलिं
गं पिशिते ऽस्त्रियां ।९२। जंभलः पुंसि जंबीरे बुद्धदेवांतरे ऽपि च । जंबूलस्तु पुमान् जंबूविटपे क्रकचच्छदे ।९३। जांगली विषविद्यायां जांगलं

जालिनीफले। जांगली शूककिंशिंब्यां स्त्री जांगलो नाकपिंजले।४६। तरलं चंचले षिड्गे भास्वरे पि त्रिलिंगकं। हारमध्यमणौ पुंसि
यवागूसुरयोः स्त्रियां।४७। तंडुलः स्याद्विडंगे च धान्यादिनिकरे पुमान्। तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे।४८। तांबूली नाग
वल्ल्यां स्त्री क्रमुके तु नपुंसकं। ताम्रलो रुजि पाके च लोहकूटे मनोजवे।४९। तुमुलः कलिद्रुमे ना क्लीबं तु रणसंकुले। तैतिलो गंड
के पुंसि क्लीबं तु करणान्तरे।५०। दुकूलं श्लक्ष्णवस्त्रे स्यात् क्षौमे च धवला गवि। धवश्रेष्ठे पुमान्वाच्यलिंगः स्मृतो ह्येच सुंदरे।५१। न
कुली कुक्कुटी मांस्योः पश्वपांडवयोः पुमान्। नाकुली कुक्कुटीकंदे रास्नायां चविके स्त्रियां।५२। नाभीलं वंक्षणे नार्य्याः कृच्छ्रग
र्भंडियोरपि। निचूलस्तु निचोले स्याद्विज्जलाख्यमहीरुहे।५३। निर्मलं स्यात्तु निर्माल्ये चाभ्रके च नपुंसकं। मलहीनेऽन्यलिंगं च
निस्तलं वर्त्तुले चले।५४। निष्कलं तु कलाशून्ये नष्टवीर्य्ये च वाच्यवत्। नेपाली तु नवमालीकुनटीसुवहासु च।५५। पललं ति
लचूर्णे च पंके मांसे नपुंसकं। ना राक्षसेऽथ पटलं पिटके च परिच्छदे।५६। छदिर्दृग्रोगतिलके क्लीबं व्रजे पुनर्न्न ना। प्रतलं पाता
लभेदे ततांगुलिकरे पुमान्।५७। पटोलं वस्त्रभेदे ना औषधौ ज्योत्स्नां तु योषिति। प्रवालोऽस्त्री किसलये वीणादंडे च विद्रुमे।५८।
पंचाली पुत्रिकागीत्योः स्त्रियां पुंभूम्नि नीवृति। पांशुलः पुंश्चले शंभोः खट्वांगे स्त्रसती भुवोः।५९। पाकलं कुष्ठभेषज्ये पुंसि
स्यात् कुंजरज्वरे। पांचालपांचने नाग्नौ वाधनद्रव्यवातयोः।६०। पाटला पाटलो स्त्री स्यादस्य पुष्पे तु नर्न्ना। आशुधान्ये पुमा
न्श्वेतरक्तवर्णेऽपि वाच्यवत्।६१। पातालं नागलोके स्याद्विवरे वडवानले। पातिली वागुरायां स्यान्नारीपात्रप्रभेदयोः।६२। पिप्प
लं सलिले वस्त्रच्छेदभेदे च ना तरौ। निरंशुके पक्षिभेदे कणायां पिप्पली स्मृता।६३। पिचुलो झावुके पि स्याद्विज्जले जलवायसे।
पिंगलो नागभिद्रुद्रचंडांशुपारिपार्श्विके।६४। निधिभेदे कपावग्नौ पुंसि स्यात्कपिलेऽन्यवत्। स्त्रियां वेश्याविशेषे च करिण्या
कुमुदस्य च।६५। पिच्छिला तोयपिप्पल्यां स्त्र्यन्यवत्सिक्तसयुते। क्लीबं तु तेजसद्रव्ये पिच्छलो विजिनेऽन्यवत्।६६। स्त्री पोति

53

म रामः
५३

काशिंशपयोःशाल्मलीसिंधुभेदयोः।उज्वलःसुंदराकारेत्रिषुपुंस्यात्मभेदयोः।२५।पेशलोरुचिरेदक्षेफेनिलोऽरिष्टपाद
पे।नासफेनेत्रिषुक्लीबंकोलीमदनयोःफले।२६।वजलानीलिकायांस्यादेलायांगविचोषिति।कृत्तिकासुस्त्रियांभूम्निविहा
यसिनपुंसकं।२७।पुंस्यग्नौकृष्णपक्षेचवाच्यवत्स्याज्जपस्रुघ्नयोः।वरलावारलाचापिगंधोलीहंसकांतयोः।२८।वार्द्दलंदुर्दि
नेमेलानंदायांवार्दलःस्मृतः।मंगलासितदूर्वायामुमायांपुंसिभूमिजे।२९।नपुंसकेतुकल्याणेसर्वार्थरक्षणे।पिचामंड
लंपरिधौकोठेदेशेद्वादशराजसु।३०।क्लीबेऽथनिवहेबिंबेत्रिषुपुंसितुकुक्कुरे।मंजुलंत्रिषुमंजौनाजलरंकौनपुंसकं।३
१।जलांबलेनिकुंजेचमहिलाफलिनीस्त्रियोः।मातुलोव्रीहिभिन्मातृभ्रात्रोश्चमनद्रुमे।३२।धूस्तूरेमाचलोवंदिचौरेचग्राह
रोगयोः।मुसलंस्यादयोग्रेतुपुंनपुंसकयोःस्त्रियां।३३।आतालमूल्यामाखुपर्ण्यांगृहगोधिकयोरपि।मृणालंनलदेक्लीबेस्त्रीन
नपुंसकयोर्बिसे।३४।मेखलाखड्गबंधेस्यात्कांचीशैलनितंबयोः।यमलंयुगलेक्लीबेयमलीचोदिकाद्वये।३५।रसालारस
नादूर्वाविदारीमार्जितासुच।रसालंसिल्हकेबोलेरसालस्त्विक्षुचूतयोः।३६।रामिलोरमणेकामेलांगुलंपुच्छशेफसोः।लांगु
लीतोयपिप्पल्यांक्लीबंतुकुसुमांतरे।३७।गोदारणंतुपणरजगृहदारुविशेषयोः।लोहलःस्यात्खलाचार्येऽव्यक्तवाचिनिचत्रि
षु।३८।वंजुलःपुंसितिनिशेवेतसाशोकयोरपि।वंडालोयुद्धभेदेचनौकायांचखनित्रके।३९।वातूलःपुंसिवात्यायांवाच्यव
न्मारुतासहे।वामिलोदांभिकेवामेत्रिषुस्यात्क्षिमलास्त्रियां।४०।शातलायांमुवोभेदेनिर्मलेत्वभिधेयवत्।विपुलःपृथुलेऽ
गाधेमेरुपश्चिमभूधरे।४१।विदुलस्तुपुमानंबुवेतसेवेतसेऽपिच।विडालोनेत्रपिंडेस्याद्वृषदंशकेपुमान्।विषला
स्त्रीविडंगवारुण्यांमुज्ञायिन्यांवयोषिति।मृगपक्षिभिदोःपुंसिपृथुलेत्वभिधेयवत्।४२।हसलोऽरंजनेभ्रूदेचंडगुप्तेचराजिनि।

मध्या

शकलं त्वचि खंडे स्याद्रागवस्तुनि वल्कले।१३४।शंबलो ऽस्त्री संबलवत्कूलपाथेयमत्सरे।शयालुः स्यादजगरे निद्राशीले च कुक्कुरे।१३५॥
श्रद्धालुर्दोहदिन्यां स्त्री श्रद्धायुक्ते तु वाच्यवत्।शष्पामलः पिप्पले हंसे शार्दूलो राक्षसांतरे।१३६।व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थिते।शा
ल्मलिस्तरुभेदे स्याद्द्वीपभेदे पि च द्वयोः।१३७।श्रीफलः पुंसि मालूरे धात्रीनीलिकयोः स्त्रियां।शीवलं स्याज्जले शैवाले शैलेये च नपुंसकं।१३८।शी
तलं पुष्पकाशीशे शैलजे मलयोद्भवे।पुमानासनपर्ण्यां स्याच्छिशिरे वाच्यलिंगकं।१३९।स्थगलो वंचके दैत्यभेदे नाडमरे स्त्रियां।शृ
ङ्खलं पुंस्कटीवस्त्रबंधे च निगडे त्रिषु।१४०।शैवलं पद्मकाष्ठे स्याच्छैवालो ऽपि पुमानयं।शोष्कलः शुष्कमांसस्यापणे के पिष्टितादिनि।
१४१।खंडशाली तैलमाने च सरसी कामुकस्त्रियोः।सरलः पद्मकाष्ठे ऽप्युदारे वक्रयोस्त्रिषु।१४२।संकुलं त्रिषु विस्पष्टवाच्यव्याप्ते ऽथ
सप्तला नवमालीचर्मकषागुंजासु पाटलो स्त्रियां।१४३।संधिला तु सुरंगायां नदीमदिरयोः स्त्रियां।सिध्मला मत्स्यविकृतौ वाच्यव
त्तु किलासिनि।१४४।सुवेलः प्रणते शांते त्रिषु नापर्वतांतरे।सुतलो ऽट्टालिकाबंधनागलोकप्रभेदयोः।१४५।हिंगुलो वर्णकद्रव्ये
नाभेटाक्यां तु हिंगुली।हेमलः स्वर्णकारे स्यात्कृकलासे शिलांतरे।१४६। लचतुः।अक्षमालाक्षसूत्रे स्यादरुंधत्यामपि स्त्रि
यां।अंकपाली परीरंभे धात्रीवेदिकयोः स्त्रियां।१४७।अथातिबलः प्रबले त्रिषु स्त्री त्वोषधीभिदि।उदूखलं गुग्गुलौ स्यादुलूख
ले ऽपि न द्वयोः।१४८।एकाष्ठीला वनतिक्तिकौषधौ पुंसि वकपुष्पे।कलकलः कलः कोलाहले तथा सर्जनिर्यासे।१४९।अथ कर्म
फलं कर्मरंग कर्मविपाकयोः।कंदरालः पुमान्गर्दभांडे प्लक्षांतरे ऽपि।१५०।कमंडलुः स्यात्करके न स्त्री ना भक्तपादपे।कुतूहलं
कौतुके स्यात्प्रशस्ते ऽपि च दृश्यते।१५१।खतमालस्तु पुल्लिंगो धूमे ऽपि च बलाहके।गंडशैलो ललाटे स्याच्च्युतस्थूलोपले गि
रेः।१५२।गंधफल्यपि गुंडापाचंपककस्य च कोरके।चक्रवालो ऽद्रिभेदे स्याच्चक्रवालं तु मंडले।१५३।जलांचलं स्रोतो वारिनिर्गमे शैव

54

एम:
५४

लेऽपि चा दलो मलं मरुवके दमनेऽपि न पुंसकं ।१५४। ध्वनिनाला तु वीणायां वेणुकाहलयोरपि । स्यात्परिमलोऽतिमर्द्दे तिम

नोहरगंधयोरपि ।१५५। सुरतोपमर्द्दे विकलच्छरीरे गाद्दिसौरभे पुंसि । अथ पोटगलः पुंसि नले च काशमत्स्ययोः ।१५६। भवेद्द

ऊफलो नीपे नाऽमलक्यां तु पोषिति । भस्मतूलं ग्रामकूटे पांशुवर्षे हिमेऽपि च ।१५७। भद्रकाली तु गंधोल्यां कात्यायन्यामपि स्त्रियाम्

।महाकालो महादेवे किंपाके प्रमथान्तरे ।१५८। भवेन्मदकलो मत्तेभे मदाव्यक्तवाचिनोः । महाबलं शीसकेऽतिबलायां स्त्री बलो

त्कटे ।१५९। त्रिलिंगमणिमाला तु हारे दंतक्षतान्तरे । महानीलो भृंगराजे मणिनागविशेषयोः ।१६०। मुक्ताफलं कर्पूरे मौक्तिके लवली

फले । स्यान्मृत्फुफला कदल्यां महाकालफले पुमान् ।१६१। भवेद्धवफलो वेणौ मांसीकुटजयोरपि । रजस्वला तु पुष्पवत्यां स्त्रियां

स्यात्सौरभे पुमान् ।१६२। बातकेलिः कलालापे विड्दंतक्षते पुमान् । अथ वासुफलं शक्रकार्मुके करकेऽपि च ।१६३। भवेद्विचकिलो

मल्लीप्रभेदे मदने पुमान् । अट्टहस्तलाशुडाकेशे मलापोटगले पुमान् ।१६४। सदाफलः स्कंधफले नारिकेले च दुंबरे । सिनीवाली तु दृष्टे

दुकलामादुर्गयोः स्त्रियां ।१६५। अथ सौवर्चलं सर्जक्षारे च लवणान्तरे । हस्तिमल्लोऽभ्रमातंगे शंखनागे विनायके ।१६६। हरितालं धा

तुभेदे स्त्री दूर्वाकाशरेखयोः । हलाहलो ब्रह्मसर्पे अंजनायां विषे स्त्रियां ।१६७। ।लपंच। आसुतीवल आख्यातः कल्पपालकय

ज्वनोः । कुंडपालः पुंसि स्यात्सर्पमत्स्यप्रभेदयोः ।१६८। एककुंडल आख्यातो बलभद्रे धनाधिपे । क्षेपीटपाल उद्दिष्टः केलितानर

समुद्रयोः ।१६९। स्यात्सांदुकंबलः श्वेतप्रावारग्रावभेदयोः । भवेत्सुरतताली तु दूतिकायां शिरःस्रजि ।१७०॥ ॥इति लान्तव

र्गः॥ ॥वेकम् । वः सांत्वने च वाते च वरुणे च निगद्यते । वं प्रचेतसि जानीयादिवार्थे च तदव्ययं ।१। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रि

ष्वात्मीये धने स्त्रियाम् । ।वद्विः। अविर्नाथे रवौ मेषे शैले मूषिककंबले ।२। अश्वः पुंजातिभेदे चतुरंगे च पुमानयं । ऊर्द्ध्वं स्यादुच्छ्रि

गु

तेतुंगे चोपदिष्टवदभिष्टुते ।३। हवः स्तुते राजिकायां कवित्री स्त्री किंपुरुषयोः। खरो काव्यकदे पुंसि खली ने स्याच्चु योषिति ।४। कल्पंव पापे मुनौ पुंसि कि
ल्पंव बीजे च सीधुनः। पापे क्लीबं नपुंसके षंडेऽन्यवदविक्रमे ।५। स्यान्तुयी वा कंधे र्यात ष्ठिरांयो नयोषिति। चार्वी तु शोभना बुध्यो ज्योत्स्ना धनद
भार्ययोः ।६। छविः शोभारुचोर्यीविज्ज्वो वेगवति त्रिषु। पुल्लिंगस्तु भवे देवे चोडुपु ब्रजवास्मृता ।७। जीवः प्राणिनि हृस्तौ च वृहद्दत्मेदे वृहर
स्पतौ। जीवा जीवंतिकामौर्वीवचा सिंजितभूमिषु ।८। नस्त्री तु जीविते तत्त्वं स्वरूपे परमात्मनि। स्याधिष्ठिले वितन्त्र्येच्च द्रवः प्रद्रावनर्मणोः ।९।

५५ रसेपि रवदावौ तु वनवह्नौ वनेप्युभौ। द्वंद्वं रहस्ये कलहे तथा मिथुनयुग्मयोः ।१०। दर्वीदारु हरिद्रायां तथा गोजिह्विकौषधौ। द्यौः स्त्री स्वर
र्गे च गगने दिवं क्लीबं तयोः स्मृतं ।११। देवो मेघे सुरे राज्ञि स्यान्नपुंसकमिंद्रिये। देवी कृताभिषेकायां तेजनी स्पृक्कयोरपि ।१२। धवः पुमा
न्नरे धूर्ते पत्यौ वृक्षांतरेपि च। ध्रुवः शंको हरे विष्णौ वटे चोत्तानपादजे ।१३। वसु योगभिदोः पुंसि क्लीबं निश्चिततर्कयोः। स्त्री मूर्वा द्रोः
प्यालपर्णीपगीतिस्तुग्भेदयोस्त्रिषु ।१४। संतते शाश्वते चाथ नवं नव्ये पुमान् स्तुतौ। नीवी परिपणे स्त्रीणां कटीवसनबंधने ।१५। पक्वं परिण

त्र ते विस्याद्विनाशाभिमुखे त्रिषु। प्लवः स्यात् प्लवने मेले मेकेऽश्वपचे कपौ ।१६। जलकाके च कुल्लके प्रवणे पर्कटी द्रुमे। कारंडवाख्ये वि
हगे शब्दे प्रतिगतो पुमान् ।१७। कैवर्त्ती मुस्तके गंधाटरणेपि स्यान्नपुंसकं। पार्श्वं कक्षांतरे चक्रोपांते पर्शुगणेपि च ।१८। श्राध्वं तु भगते चाति
दूरवर्मीवर्त्मनि निबंधने। पृथ्वी भूमौ महत्यां च तैलकृष्णाजीरके ।१९। भवः क्षेमे शर्वसंसारे सत्तायां प्राप्तिजन्मनोः। भावः सत्तास्वभावा
भिप्रायचेष्टात्मजन्मसु ।२०। क्रियालीलापदार्थेषु विभूतिबुधजंतुषु। रत्यादौ चाथ रेवा स्यान्नीली रंभा रतिस्मरे नदीभिदि ।२१। लवो लेशे वि ए.म: ५५
नाशे च छेदने रामनंदने। लट्वाकरंजभेदे स्यात् फले वाद्ये खगांतरे ।२२। लघ्वी लाघवयुक्तायां प्रभेदे स्यंदनस्य च। विश्वा त्वतिविषा
यां स्त्री जगति स्यान्नपुंसकं ।२३। न ना शुंठ्यां पुंसि देवप्रभेदे चाखिले त्रिषु। बिल्वं फले श्रीफले ना शावः स्यात्कुणपे पुमान् ।२४। नपुंसकं

तुषानीये शिवि र्भूर्जेऽन्नपे पुमान्। शिवो मोक्षे महादेवे कीलकग्रहयोगयोः।२५। वालुके गुग्गुलौ वेदे पुंडरीके द्रुमे पुमान्। सुखे क्षेमजले क्लीवं शि
वा रूढामलो षधौ।२६। अभया मलकी गौरी फेरु सत्कृतफला सु च। शिवस्तु भूर्जपत्रे स्यात्तथोदारमहीपतौ।२७। शुल्वं ताम्रे यज्ञकर्मण्याचारे
जलसन्निधौ। सत्वं गुणे पिशाचादौ बले द्रव्य स्वभावयोः।२८। आत्मत्वे व्यवसायासु चित्ते च स्त्री तु जंतुषु। सत्वो यज्ञे च संधाने सांत्वं दाक्षिण्य
सामयोः।२९। स्रुवा द्वयो र्होमपात्रे शाह्ना कीमूर्वयोः स्त्रियां। हवश्चाज्ञाध्वरा कानेकस्थान्यक स्वर्वयो स्त्रिषु।३०। वस्त्रिः श्चक्षीवं वशिरं
शिग्रौ नाम्नि तेपुनरन्यवत्। अभावो मरणेऽसत्वे आहवो युद्धयज्ञयोः।३१। आर्तवं स्त्रीरजो पुष्पे क्लीवं स्यादृतुजे त्रिषु। आश्रवो गीकृतौ
क्लेशे नान्यवद्वचनस्थिते।३२। उद्भवो यादवभिद्दिमहे वक्रतु पावके। उत्सवो महउत्सेकेऽथ्याग्रसवकोपयोः।३३। कारवी मधुरादीप्य
त्वक्पत्री कृष्णजीरके। कितवस्तु पुमान्मत्ते वंचके कनकाह्वये।३४। केशवोऽजे च पुन्नागे पुंसि केशवति त्रिषु। कैतवं तु छले द्यूते कैरवः
कितवे रिपौ।३५। नपुंसकं च कुमुदे चंद्रिकायां तु कैरवी। गांडीवो गांडिवश्चास्त्री कार्मुकेऽर्जुनकार्मुके।३६। गालवस्तु मुनौ लोध्रे तांड
वोऽस्त्री तृणांतरे। भवे दुद्धतनृत्ये च त्रिदिवा सरिदंतरे।३७। पुंसि स्वर्गे दीदिविर्ल्लोधिषणोऽन्नेतदस्त्रियां। निष्पावः सूर्पपवने राजमा
षे कडुंगके।३८। पवने शिंबिकायां ना निर्विकल्पेऽन्यलिंगकः। निष्कावः पुंसि निष्कृतावविश्वासापलापयोः।३९। पल्लवोऽस्त्री किसलये वि
टपे विस्तरे वने। शृंगारेऽलक्तरागे स्त्री प्रभावः शक्ति तेजसोः।४०। पंचत्वं पंचतां भावे प्राणनाम त्ययेऽपि च। प्रभवो जन्ममूले स्याज्जन्महे
तौ पराक्रमे।४१। ज्ञानस्य चाद्यमस्थाने प्रसवो गर्भमोचने। उत्पादे स्यादपत्ये विफले च कुसुमे पि च।४२। प्रसेवः पुंसि वाणांगे स्यूते च पार्थि
वोन्नपे। पार्थिवी तु श्रीनाम्यां स्त्री पृथिव्यां विकृतौ त्रिषु।४३। पुंगवः स्याद्बलीवर्दप्रभेदे व्यो षधस्य च। उत्तरस्थः पुनः श्रेष्ठे फेरवो जंबुकेऽ
स्त्रपे।४४। वल्लवः सूपकारे स्याद्भीमसेने च गोदुहि। बांधवो बंधुसुहृदो र्भागिनेयो गजधन्विनोः।४५। शुक्रे परशुरामे च भार्गवी पार्वती स्त्रि

56

योः॥ दूर्वायां भेरवः पुंसि शंकरे भीषणे त्रिषु॥४६॥ माधवोऽजे मधौ राधे यादवे नास्त्रियां मिसौ। मधुशर्करा वासंती कुट्टनी मदिरासु च॥४७॥ गोम
हिष्यादिसंपत्तौ यादवः पुंसि केशवे। राजीवं नलिने ना तु मेदे हरिणमीनयोः॥४८॥ राघवोऽब्धेर्महामीनभेदे च रघुवंशजे। रौरवो नरके घोरे वडवा
द्विजयोषिति॥४९॥ अश्वायां कुंभदास्यां च नारीजात्यंतरेऽपि च। वाडवं करणे स्त्रीणां घोटकौघे नपुंसकं॥५०॥ पाताले न स्त्रियां पुंसि ब्राह्मणे वडवा
नले। विभवो रै मोक्षैश्वर्ये विद्रवो विद्रुतौ धियि॥५१॥ विभावः स्यात्परिचये रसस्योद्दीपनादिषु। शात्रवं भावसंहत्योः शत्रूणां शात्रवो द्विषि॥५२॥
षाड्वो गानरसयोः सचिवो मंत्रिचेटयोः। सहाये संभवो हेतावुत्पत्तौ मेलकेऽपि च॥५३॥ आधारे नतिरिक्तत्वे प्याधेयस्य निगद्यते। सुग्रीवो वासुदेव
स्य हये शाखामृगेश्वरे॥५४॥ सुखवी कारवेल्ले स्यात्कृष्णजीरकजीरयोः। सैंधवोऽस्त्री मणिमंथे नाऽश्वे सिंधुभवे त्रिषु॥५५॥ ॥वचतुः॥ अनुभा
वः प्रभावे स्यान्निश्चये भावबोधके। भवेदभिषवः स्नाने मद्यसंधानयज्ञयोः॥५६॥ अपह्नवस्तु पुल्लिंगः स्मृतः स्नेहापलापयोः। आदीनवः
पुमान्दोषे परिक्लिष्टदुरंतयोः॥५७॥ उपप्लवः सैंहिकेये विप्लवोत्पातयोरपि। कुशीलवस्तु वाल्मीकौ नटयाचकयोरपि॥५८॥ जलविल्वः कर्क
टे स्यात्संचांगे जलचत्वरे। जीवंजीवश्चकोरे स्याद्द्रुमभेदे विपुंस्ययं॥५९॥ धामार्गवस्तु पुंसि स्यादपामार्गे च घोषके। पारिप्लवश्चाकुले स्याच्चं
चले च पराभवः॥६०॥ तिरस्कारे विनाशे च पुंसि पारशवः पुमान्। परस्त्रीतनये शस्त्रे द्विजाच्छूद्रासुतेऽपि च॥६१॥ पुटग्रीवस्तु पुल्लिंगो गर्गरीता
म्रकुंभयोः। वलदेवो वले वाते त्रायमाणौषधौ स्त्रियां॥६२॥ रंतिदेवस्तु नृपतेर्भेदे च गरुडध्वजे। रोहिताश्वः कृशानौ च मानौ हरिश्चंद्रनृपात्मजे॥६
३॥ अश्वप्रीतप्रिवेल्लीवंशे लुयमलिमपयोः। पुंसि शस्तु फलाढ्ये तथा मधुरिकौषधौ॥६४॥ सहदेवा वलादंडोत्पलयोः शारिवौषधौ। सह
देवी तु सर्पाक्ष्यां पुंसि स्यात्पांडवे पुनः॥६५॥ ॥वपंच॥ आशितंभवमन्नाद्ये तृप्तौ वप्याशितंभवः॥ ॥इति वांतवर्गः॥ ॥शाद्विः॥ अं
शुः प्रभाकिरणयोरंशोः शस्तु दिशोः स्त्रियां। आशुर्धान्यांतरे शीघ्रे ईषा लांगलदंडके॥१॥ ईशः प्रभौ महादेवे काशी वाराणसीपुरे। नस्त्रि

श.मः
५६

यां तृणभेदे स्यात्कीशो दिगंबरे कपौ।२। कुशी फाले कुशा रज्ज्वां त्रिषु पापिष्ठमत्तयोः। योक्त्रे रामसुतद्वीपे नादर्भेऽस्त्री कुशं जले।३। केशः स्या
त्पुंसि वरुणे कौबेरे कुंतलेऽपि च। क्लेशो दुःखे पि कोपे विव्यवसायेऽपि दृश्यते।४। कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधानके। जातिकोषेऽ
र्थसंघाते पेश्यां शब्दादिसंग्रहे।५। दर्शस्तु स्यादमावास्यायागभेदावलोकने। दंशः कीटविशेषे च वर्मदंशनयोः पुमान्।६। दशावस्था दीपव
र्त्योर्वस्त्यंते भूम्नि योषिति। दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षके।७। नाशः पलायने पि स्यान्निधनानुपलंभयोः। निशा दारुहरिद्रा
यां स्यात्त्रियामाहरिद्रयोः।८। पशुर्मृगादिके वाजे नाऽव्ययं पश्चदर्शने। पाशः केशादिपूर्वः स्यात्तत्संघे कर्णपूर्वकः।९। सुकर्णे च स सामर्थ्ये
न्मृगपक्ष्यादिबंधने। पांशुर्धूलौ च सस्यार्थे चिरसंचितगोमये।१०। पेशी सुपक्वकलिके मांस्यां खड्गपिधानके। मांसपिंड्यां मंडभेदे राक्षिर्भेपा
दिपुंजयोः।११। पुंसि वंशः कुले वेणौ पृष्ठावयववर्गयोः। वशा वंध्या सुता योषास्त्री गवी करणी सुचा।१२। त्रिष्वायत्ते क्लीबमायत्तत्वे चेच्छाप्रभुत्व
योः। विट् पुंसि मनुजे वैश्ये प्रवेशो वेश्यागृहे गृहे।१३। नेपथ्ये च शशो बोले लोध्रे च पशुभेदयोः। स्पर्शो रुजायां दाने च स्पर्शने स्पर्शके पि च॥
।१४। स्पर्शः स्यात्संपराये च प्रतिधावविपुंस्पयां।   ।श। त्रिः। आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि।१५। उड्डीशो ग्रंथभेदे स्यादुड्डीशश्चंद्रिकाप
तौ। उपांशुर्जपभेदे स्यादुपांशु विजनेऽव्ययं।१६। कपिशस्त्रिषु श्यावे स्त्री माधव्यां सिल्हके पुमान्। कर्कशः कासमर्दे स्तुकांपिल्ल्ये परुषे
पुमान्।१७। त्रिषु साहसिके क्रूरे दृढामसृणनिर्दये। कीनाशः कर्षकक्षुद्रोपांशुघातिषु वाच्यवत्।१८। यमे ना कुलिशो नस्त्री दंभोलौ ना झ
षांतरे। गिरीशो द्रिपतौ वाचस्पतिशंकरयोः पुमान्।१९। तुंगीशस्तु पुमान् गौरीवल्लभे हिमदीधितौ। दुःस्पर्शो धन्वयासेना कंटकार्य्यां स्त्रि
यां त्रिषु।२०। खरस्पर्शेऽथ निस्त्रिंशः खड्गे ना निर्दये त्रिषु। निर्वेशस्तु पुमान्भोगे वेतने मूर्छने पि च।२१। निवेशः पुंसि विन्यासे शिबिरोद्वाहयोर

पि।२२।नीकाशो निश्चये तुल्ये पलाशं छदने मतं। शटी किंशुकरक्षः सु पुंसि द्विरिते त्रिषु।२३। प्रकाशस्तु स्फुटे ख्यातः प्रहासातपयोरपि। प्रदेशो देश
मात्रे स्यात्तर्जन्यंगुष्ठसंमिते।२४। भित्तावपि च पिंगाक्षी नीलिकायां नपुंसकं। जालस्वर्णेषु मान्पक्षौ पतौ मत्स्यांतरेऽपि च।२५। बालिशश्च शिशौ मू
र्खे मूकेशः शैवले वटे। मूकेशश्च लजेऽपि स्यात् ह्रस्वो मशो मुनि मेषयोः।२६। लोमान्विते स्त्रियां काकजंघा मांसी वचासु च। म्हूकर्णिं वि महा
मेदा काकोली शाकिनी भिदा।२७। विवशस्त्रिष्ववश्यात्मारिष्टदुष्टधियोरपि। विकाशः पुंसि विजने प्रकाशे सहस्रं समे।२८। उचिते चाथ सं
वेशः स्वापस्त्रीरतबंधयोः। सुखाशो वरुणे राजतिनिशे सुखभोजने।२९। हताशो निर्दये चाशारहिते पिशुनेऽपि च। ।पश्चतुः॥ अपदेशः पु
मान्लक्ष्ये निमित्त व्याजयोरपि।३०। अपभ्रंशस्तु पतने भाषाभेदापशब्दयोः। आशापाशः पुमान्वकौ त्रिषु वाश्रयनाशके।३१। उपस्पर्शः
स्पर्शमात्रे स्नानाचमनयोरपि। उपदंशो विदंशे च मेढ्ररोगांतरेऽपि च।३२। क्रूरदिक् पिशुने वाच्यलिंगः पुंसि शने स्वरे। खंड पर्शुः पर्शु
रामे पर्शुः करे चूले लेपि नि।३३। खंडशमलके भेषजे सिंहिकातनयेऽपि ना। जीविते शोय मे पुंसि त्रिषु स्यात् जीविते श्वरे।३४। नागपाशः पुमान्
स्त्रीणं करणे वरुणायुधे। पंचदशी स्वमावास्या पौर्णमास्योश्चयोषिति।३५। प्रतिसर्पः सहाये स्यात् हस्तोहरपुरोगयोः। परिवेशो वेष्टने स्यात्परिधानेऽपि पुंस्ययं।
३६। पादपाशी त्वेकुकायां शृंखलायामपि स्त्रियां। पुरोडाशो हविर्भेदे चमसे स्यात् पिष्टकस्य च।३७। ऊत शेषे भूंचेमिस्थकः पुंसि मानवबेशयोः। ।इति
शांतवर्गः।। ।षैकं। पः कर्षः पुंसि वित्ते च श्रेष्टः स्यादभिधेयवत्। होः संवर्तेरा हसे च नरसिंहे च विद्युति।।१।। होत्रेनाशे होत्रपाले द्विर्निर्वासेगतौ दृ
ये। षद्विः।। ।अहो ज्ञातार्थशकटव्यवहारेषु पाशके।२। रूद्रोह्रेद्राद्वयोः सर्पे विभीतकतरावपि। चक्रे कर्षे पुमान्स्त्री वं तुल्ये सो व द्वैले द्वि ये
३। उष्णावाणस्तु नाराच्योरुषः कामि निगुग्गुलौ। रात्रिशेषे उषा यांतु केचिदाऊरतादव्ययं।४। ऊषः क्षार म्हदि प्रोक्ते प्रभातेऽपि पुमानयं। तत्संध्यायां
चरंधे च चंदनाद्रो श्रवो बिले।५। रूक्षः पिवेदिवशिष्टा दोदीधितो च पुमानयं। रूपत्तः पर्वतमेदे स्यात् ह्रनूके प्राणके पुमान्।६। तक्षत वे धनेऽन्य

५२

३

रामः
५७

लिंगे नदत्वे तु पुंनपुंसकं। कक्षा स्यादंतरीयस्य पश्चादंचलपल्लवे।७। स्पर्द्धापदे नादो मूले कच्छवीरुत्तृणे पुंसि। कर्षो ना कर्षणे मानभेदे पुंन्न-
पुंसके।८। कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्येष्टिखातयोः। काश्चीगुवरिकायां च सौरभ्ये मद्येपि स्त्रियां।९। कोषोऽस्त्री कुड्मले पात्रे दिव्ये खड्गपिधान-
के। जातिकोषेऽर्थसंघाते पेशीकोषाद्दिसंग्रहे।१०। घोष आभीरपल्ल्यां स्याद्गोपालध्वनिघोषके। कांस्ये चांबुदनादे ना घोषा मधुरिकौषधौ
।११। चोक्षो गीतेषु चोक्षदक्षे तथाऽभीक्ष्णमनोज्ञयोः। कृष्णा नागवलायां स्त्री ताम्रमत्स्याप्वीपुंना।१२। तर्षो लिप्सोदन्ययोस्त्विट् कांतौ वाचि
रुचौ स्त्रियां। तुषो धान्यत्वगद्वौः त्रषा लिप्सात्रषोः स्त्रियां।१३। तृट् लिप्सायामुदन्यायां स्मरपुत्र्यामपि स्त्रियां। दक्षास्त्रिषु पटौ पुंसि ताम्रचू-
डे प्रजापतौ।१४। मुनिभेदे हरवृषे द्रुमभेदे स्त्रियां भुवि। दोषः स्याद्दूषणे पापे दोषा रात्रौ भुजेपि च।१५। ध्वांक्षो मत्स्यात्खगे काके तक्षके भि-
क्षुकेपि च। ध्वांक्षी ककोलिकायां स्यान्न्युक्तेका स्त्रैं तृणेपि च।१६। क्लीबेऽक्षं पुंसि महिषे निकृष्टे पुनरन्यवत्। प्लक्षो जटीगर्द्दभांडद्वीप-
भित्कुंजराशने।१७। पक्षो मासार्द्धके पार्श्वे गरुत्साध्यविरोधयोः। केशादेः परतो वृंदे बले सखिसहाययोः।१८। चुल्लीरंध्रे पतत्रे च राजकुं-
जरपार्श्वयोः। प्रोक्षा तु स्नेहक्षरणे वृक्षे भेषः क्लेशे च मर्द्दने।१९। उन्माने प्रेषणे पोषो माषस्तत्कर्णिमानिषौ। स्त्रियां भिक्षा भृतौ याच्ञा सेवाभिक्षितवस्तु-
नुः।२०। माषोऽस्त्री स्यांतरे मूर्खे मानत्वग्दोषभेदयोः। मिषं व्याजे स्पर्द्धने ना मेषो राश्यंतरे स्तभे।२१। मेषज्यभिदि मोक्षस्तु मुक्तिपाटलिमोचने॥
यक्षो गुह्यकमात्रे च गुह्यकाधीश्वरेपि च।२२। रक्षा जतुरक्षणयो रुक्षस्त्वप्रेमस्निग्धचिक्कणे। लक्षो न पुंसि संख्यायां क्लीबं व्याजशरव्ययोः।२३।
वर्षो स्त्री भारतादौ च जंबूद्वीपाब्दवृष्टिषु। प्रावृट्काले स्त्रियां भूम्नि विट्स्त्री व्यापनविष्ठयोः।२४। विषं तु गरले तोयेऽतिविषायां च योषिति॥
वृषो धर्मे बलीवर्द्दे शृंग्यां पुंराशिभेदयोः।२५। श्रेष्ठे स्यादुत्तरस्थश्च व्यास मूषिकस्तु कले तथा। वास्तु स्यान्नभेदे पुमाने पश्च कीर्तितः।२६। वृषा
मूषिकपर्ण्यां च यतीनामासने वृषी। व्योषं स्यात्त्रिकटुद्रव्ये कृमिभेदे पुमान् नयं।२७। प्रुषिः प्लोषे विले स्त्री स्याच्छ्लेषः संकर्षणे वधे। अनंते नागसा-

देवनस्व निर्म्मो ल्यापर्ष्वणे स्त्रियां।२८।उपयुक्तेतरे नस्त्री शेषोयद्न्म णिपि पोषणे। ।षत्रिंगग्र अध्यक्षोऽधिकृते पुंसि स्यात्प्रत्यक्षेऽभिधेयवत्।२९।
अभीषुः प्रग्रहे रश्मौ नाक्षं वा द्यूतेऽक्षं इन्द्रिये।पाशके पारिफलके कोदंडाभ्यासवस्तुनि।३०।आकर्षोऽपि पुंसि स्यादामिषं पुंन्नपुंसकं।भोग्य
वस्तुनि संभोगेऽप्युत्कोचे पललेऽपि च।३१।उष्णीषस्तु शिरोवेष्टे किरीटे लक्षणान्तरे।उत्प्रेक्षा त्वनवधानेऽपि काव्यालंकरणान्तरे।३२।कल्माषं कि
ल्बिषे क्लीवं पुंसि स्यान्नरकांतरे।कल्माषे यातुधाने च कृष्णपांडुरकृष्णयोः।३३।कलुषं त्वाविले पापे किल्बिषं पापरोगयोः।अपराधेऽपि कुल्माषं कांजिकेया
वके पुमान्।३४।गंडूषो मुखपूर्त्तौ स्त्री मपुष्करस्य स्तोम्मिते।गवाक्षी शक्रवारुण्यां गवाक्षो जालके कपौ।३५।गोरक्षो नागरंगे स्याद्योवा श्वपरिरक्षके।जि
गीषा जेतुमिच्छायां व्यवसायप्रकर्षयोः।३६।तरीषी शक्रकन्यायां पुंसि स्वर्गे महोदधौ।तारीषी च इन्द्रकन्यायां ना स्वर्गे बुधिकां च ने।३७।नहुषो नागभे
दे स्यात्सोमवल्ल्यन्धेऽपि च।निकषः शाणफलके निकषा यातुमातरि।३८।निमेषनिमिषौ कालप्रभेदेऽक्षिनिमीलने।परुषं कर्बुरे रूक्षे निष्ठुरे क्लीब
वाच्यवत्।३९।प्रदोषः समये दोषे प्रत्यूषोऽहर्मुखे वसौ।पीयूषं सप्तदिवसावधिक्षीरे तथामृते।४०।पुरुषः पूरुषे सांख्यज्ञे च पुन्नागपादपे।पौरुषं
पुरुषस्य स्याद्भावे कर्मणि तेजसि।४१।ऊर्द्ध्वविस्तृतदोःपाणिनृमाने त्वभिधेयवत्।महिषी कृताभिषेका सैरिभ्योषधीभिदि।४२।मारिषः शाकभि
द्यार्ये नाट्योक्त्या पुंसि योषिति।दक्षात्मजायां मृगाक्षी तु विशालाक्ष्मानेत्रयोः।४३।रक्ताक्षः कासरे क्रूरे पारावतचकोरयोः।रोहिषं कत्तृणे क्लीवं पुंसि स्याद्धरिणान्
तरे।४४।विश्लेषो विधुरे योगे शुश्रूषा स्यादुपासने।कथने श्रोतुमिच्छायां शैलूषो नटबिल्वयोः।४५।संहर्षस्तु पुमान्स्पर्द्धे स्पर्द्धायां च प्रभंजने।समी
क्षा तु स्त्रियां तत्वे तु द्यावपि निमीलने।४६।षान्ताः। ।अनुकर्षो रथाधस्थदारुण्यपकर्षणे।अम्बरीषं रणे भ्राष्ट्रे क्लीवं पुंसि नृपान्तरे।४७।न
रकस्य प्रभेदे च किशोरे भास्करेऽपि च।आम्रातकेऽनुतापे चानिमेषो मत्स्यदेवयोः।४८।अनुतर्षः सुरापानपात्रे तृष्णाऽभिलाषयोः।अहिहिद्रुरुबेश
के मयूरे नकुले पुमान्।४९।अलंबुषः प्रहस्ते च छर्दने राक्षसान्तरे।अलंबुषा तु मुंडीर्यां स्वर्गवारांगनान्तरे।५०।अथ किंपुरुषो लोकभेदे किन्नरयोः
पुमान्।देववृक्षः सप्तपर्णे मंदारादिषु गुग्गुलौ।५१।नंदिघोषोऽर्जुनरथे घोषे वंदिजनस्य च।परिवेषस्तु द्विगः परिधौ परिवेषणे।५२।परिघोषोनि



नादे स्यादाशा वाच्येऽजलदध्वनौ ।१। लंकषा गोहुरके स्त्री गुग्गुलु किंशुके ।५२। मुंडीरी लाक्षयोः स्त्री राक्षसे तु पलंकषः । वीरवृक्षस्तु भल्लातक ककुभद्रुम-
योः पुमान् ।५३। भूतवृक्षस्तु शाखोटद्रुमे श्योनाकपादपे । महाघोषा तु कर्कटशृंग्यां पुंसि तु घोषणे ।५५। क्लीवं हृदे राजहंसस्तु वर्णालिपियालयोः । वात-
रूषस्तु वातूलोत्कटयोः शक्रकार्मुके ।५६। विश्रमलालो हरे तौ सैन्यासु नेत्रेऽभिधेयवत् । सकृत्प्रजो वराहे नाकर्णान्तस्य हि ते त्रिषु ।७५। इति षान्तवर्गः
॥ ॥ स द्विः । कंसोस्त्री तैजसद्रव्ये कांस्ये मानेऽसुरे तु ना । कासूर्विकलवाचि स्यात्तथा शक्त्यायुधे स्त्रियां ।१। पुलस्तः स्यात्तृत्वके स्तवे हारभिद्गंधिपर्णयोः
।२। गोसो वालोऽवसोऽग्र्या समेहेतु पहितभिदोः पुमान् ।३। त्रासो भये मणेर्दोषे दासी वाणां भुजिष्ययोः । दासो भृत्ये च शूद्रे च ज्ञातात्मनि च धीवरे । धनासा तु नासि-
कायां च दारोर्द्दारुण्यां स्त्रियां ।४। प्रसूरश्वा जनन्योश्च कंदली वीरुधोः स्त्रियां ।५। वसुर्नादेवभेदाग्निभा योक्त्रे वकराजसु । क्लीवे वृद्ध्यौषधेऽश्वे च वरे रत्ने
मधुरे त्रिषु ।६। मासः पुंसि प्रभायां स्याद्विशेषे विहगस्य च । भाः प्रभावे मयूखे स्त्री माषश्चैडमासुयोः पुमान् ।६। मांसं स्यादामिषे क्लीवं कक्कोलीजट्योः स्त्रि-
यां । मिसिः स्त्री मधुरामांस्योः शतपुष्पाजमोदयोः ।७। रसः कोदंप्योश्चष्ठ्यादिरसो गंधरसे जले । शृंगारादौ विषे वीर्ये तिक्तादौ द्रवरागयोः ।८। देह-
धातुप्रभेदे च पारदस्वादयोः पुमान् । रस्त्रियां तु रसना पाठा शल्लकी कंगुभूमिषु ।९। रासः कोलाहले ध्वाने भाषा शृंखलकेपि च । क्रीडाभेदे च गोपार-
नां वत्सः पुत्रादि वर्षयोः ।१०। तर्णके नोरसि क्लीवं व्यासो ना विस्तृते मुनौ । शंसा वचसि वांछायां हंसः स्यान्मानसौकसि ।११। निर्लोभनृपविष्णु-
कोपरमात्मनि मत्सरे । योगिभेदे मंत्रभेदे शरीरमरुदंतरे ।१२। तुरंगमप्रभेदेपि हिंसा चौर्यादिघातयोः ॥ ॥ स त्रिः । अलसा हंसपद्यां ना पाद-
रोगद्रुमभेदयोः ।१। आक्रियामंदे त्रिषु पार्ष्णिर्मयूखशिखयोर्ना ऽन्यदः परस्मिन्नत्र स्यादभ्यासोऽभ्यसनेऽन्तिके ।२। आगो पराधे पापे स्यादा-
श्वासः पुंसि निर्दिष्टो । आख्यायिकोपरिच्छेदे चाशीर्हितेमरुद्भुजोः ।३। हितस्याशंसने स्त्री स्यादिष्वासः कार्मुके पुमान् । त्रिषु स्यात्क्षेपके चेषोरु-
च्छ्वासः प्राणनेपि च ।४। आख्यायिकोपरिच्छेदेप्याश्वासेपि पुमानयं । उत्तंसः कर्णपूरेपि शिखरेऽपि च न स्त्रियां ।७। उपसः प्रसूषसि क्लीवं पितृप्रस्वाच

पि२

योषिति। उरो वक्षसि चाश्लेषे ह्येनः पापापराधयोः। १८। ओजो दीप्तावष्टंभे प्रकाशबलयोरपि। ओकः स्यादाश्रयमात्रे च मंदिरे च नपुंसकं। १९। कीकसः
कृमिजातौ स्यात्पुंसि कुल्ये नपुंसकं। चमसो यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियां। २०। छंदः पद्ये च वेदे च स्वैराचाराभिलाषयोः। ज्यायो वृद्धेऽतिप्रश
स्ते ज्योतिरग्नौ दिवाकरे। २१। पुमान्नपुंसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः। नरो बले च रोगे च तपो लोकांतरेऽपि च। २२। चांद्रायणादौ धर्मे च पुमा
न् शिशिरमाघयोः। तमो ध्वांते गुणे शोके क्लीबं वा ना विधुंतुदे। २३। तामसी निशि दुर्गायां तामसो भुजगे खले। तेजो दीप्तौ प्रभावे च स्यात्पराक्रम
रेतसोः। २४। धनुः पियाले ना न स्त्री राशिभेदे शरासने। धनुर्द्धरे त्रिषु नभः क्लीबं व्योम्नि पुमान्घने। २५। घ्राणश्रावणवर्षासु बिसतंतौ प
तद्ग्रहे। पनसः कंटकिफले कंटके वानरांतरे। २६। स्त्रियां रोगप्रभेदे स्यात्पयः स्यात्क्षीरनीरयोः। पायसस्तु क्लीबपुंसोः श्रीवासपरमान्नयोः
। २७। पुंकोसी कलिकानील्योः पुंकसः श्वपचेऽधमे। बीभत्सो नार्जुने क्रूरे घृणात्मविकृते त्रिषु। २८। भूयांस्त्रिषु बहुतरे पुनरर्थे तदव्ययं
। मनस्वित्ते मनीषायां महउत्सवतेजसोः। २९। मानसं सरसि स्वांते रभसो हर्षवेगयोः। रहस्तलरते गुह्ये रजः क्लीबं गुणांतरे। ३०। आर्त्तवे च परा
गे च रेणुमात्रे च दृश्यते। राक्षसो यातुधाने स्याच्चंडायां राक्षसी स्मृता। ३१। रेपाः स्यादधमे क्रूरे रूपणेऽप्यभिधेयवत्। रेतः शुक्रे पारदे च रोद
श्च रोदसीति च। दिवि भूमौ पृथक् चे स्यात्सहो तत्साम्ये तयोस्तथा। लालसौत्सुक्यतृष्णातिरेकयांचासु च द्वयोः। ३३। वयः पक्षिणि बाल्यादौ यौ
वने च नपुंसकं। वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि। ३४। पुंसि वेद्रस्तु नये वर्हिः पुंसि कृताशने। न स्त्री कुशे वपुः क्लीबं तनौ शस्ताकृतावपि
। ३५। वतंसस्तु पुमान्कर्णपूरे शेखरयोरपि। वाहसो जलनिर्यासेऽघ्याले सुनिषण्णके। ३६। वायसोऽगुरुवृक्षे च श्रीवासध्वांक्षयोः पुमान्। का

कोदुंबरिकायां च काकमाच्यां च वायसी। ३७। विद्वानात्मविदि प्राज्ञे पंडिते चाभिधेयवत्। विलासो हावभेदे स्याल्लीलायामपि पुंस्ययं। ३८। वी
तंसो बंधनोपाये मृगाणां पक्षिणामपि। तेषामपि च विश्वासहेतोः प्रावरणेऽपि च। ३९। वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनि। शिरः प्रधा

५१

एमः
५९

नेसेनाग्रेऽपि शिखरे मस्तकेऽपि च ।४०। श्रीवासो हृत्कधूपेऽपि पंकजे मधुसूदने । श्रेयो मुक्तौ शुभे धर्मेऽतिप्रशस्ते च वाच्यवत् ।४१। श्रेयसी करिपिप्पल्याम
भयापाठयोरपि । सहो बले ज्योतिषि च पुंसि हेमंतमार्गयोः ।४२। सरसी विस्तृकासारे सरो नीरतडागयोः । स्यात्समासस्तु उद्दिंगः संक्षेपे च समर्थने ।४३। सारसः
पक्षिभेदे द्वयोः क्लीबं तु सरसीरुहे । साहसं तु बलात्कारकृतकार्ये दमेऽपि च ।४४। सुरसस्तु त्रिपुस्त्वादौ पर्णासे तु नपुंसकं । स्त्री रास्नानागमात्रोः स्रस्तो नोतं तु वेगद्रं
ड्रियो ।४५। हविर्होतव्यमात्रे च सर्पिष्यपि नपुंसकं । स्त च तुः । ।अधिवासो निवासे स्यात्संस्कारे धूपनादिभिः ।४६। अवध्वंसः परित्यागे निंदने प्यवचूर्णने ।
अवतंसो न स्त्रियां स्यात्कर्णपूरे च शेखरे ।४७। अगौकाः पुंसि शरभे पक्षिपंचास्ययोरपि । उदर्चिरुत्तमे वाच्यलिंगः पुंसि कृशानने ।४८। कलहंसस्तु कादंबे
राजहंसे नृपोत्तमे । कनीयान पियूनि स्यादल्पानुजयोस्त्रिषु ।४९। कुंभीनसः क्रूरसर्पे स्त्रियां लवणमातरि । भवेद्दुर्नरसः सांद्रे निर्यासे मारटे स्तुनि ।५०।
।कर्पूरे पीलुपर्ण्यां च सस्यकः सिद्धरसेऽपि च । चंद्रहासो दशग्रीवकरवालेऽसिमात्रके ।५१। जरायुः पुंसि संपातेः कनीयसि च गुग्गुलौ । अथ ताम्ररसं पद्मे
ताम्रकांचनयोरपि ।५२। त्रिस्रोता जह्नुकन्यायां स्रोतस्वत्यंतरे स्त्रियां । दिवौका अदिवौका अपुंसि देवे च चातके ।५३। दीर्घायुः शाल्मलीवृक्षे वायसे जी
वकद्रुमे । मार्कंडेये च पुंसि स्याच्चिरजीविनि वाच्यवत् ।५४। नगौकाः पुंसि शरभे पक्षिपंचास्ययोरपि । निःश्रेयसं तु कल्याणमोक्षयोः शंकरे पुमान् ।५५। नीर
लांजसाऽस्त्रभेदे सरिज्जादे च विद्युति । प्रचेताः पाशिनि मुनौ ना प्रकृष्टहृदि त्रिषु ।५६। पुनर्वसुर्ना मुनिभिद्यजे द्वित्वे तु भांतरे । पौर्णमासः पुमान्यज्ञभेदे
स्त्री पूर्णिमातिथौ ।५७। महारसः स्यात्खर्जूरे कोशकारकशेरुणोः । मलीमसस्तु मलिने पुष्पकाशीशलोहयोः ।५८। भवेन्मधुरसा द्राक्षा मूर्विका दुग्धि
कासु च । यमस्वसा तु दुर्गायां यमुनायामपि स्त्रियां ।५९। यवीयाननुजेऽपि स्यादतियूनि च वाच्यवत् । रासेरसस्तु गोष्ठ्यां स्याद्रासः शृंगारयोरपि । क्षारससि
द्धिरसा वासः षष्ठीजागरकेऽपि च । राजहंसस्तु कादंबे कलहंसे नृपोत्तमे ।६०। शर्वरीयान्योगभिक्षेः ईश्वरीश्वति यूनि त्रिषु । विहायाः शकुने पुंसि गगने पुन्नपुं
सकं ।६२। विभावसुः सुमाल्ये हारभेदे च पावके । श्वःश्रेयसं च कल्याणे परमात्मनि शर्मणि ।६३। अथ सर्जरसो वाद्यभांडभेदे च धूपके । सप्तार्चिः पावके पुं

१३४८०५

सिक्ते क्रूरवत्तु पिसु त्रिषु।९४।साधीयानतिबाढे स्याद् अतिसाधौ तु वाच्यवत्।सिन्धूरसो रसे पुंसि धातु अप्रतिशु त्रिषु।९५।सुमनाः पुष्पमालत्योः स्त्रियां नाधीरदेवयोः
।सुमेधास्तु स्त्रियां ज्योतिष्मत्यां त्रिषु सुबुद्धिनि।९६।सपंचा।दिव्यचक्षुः सुगंधस्य मेदेनांधे सुलोचने।स्यान्नभस्यमसृग्मद्रे चित्राशपेंद्रजालयोः।९७।हिंगु
निर्य्यासदल्येष निंबे हिंगुरसेऽपि च।सषट्। ।हिरण्यरेताः पुंसि स्याद् दिवाकरहविर्भुजोः।९८।इति सांतवर्गः॥ ॥हैकम्। ।हः शिवे [illegible] सलिले स्मृने
धारणे मंगलेऽपि च।गगने नकुलीशे च रक्ते नाके च वर्णिते।१।हद्विः। ।अहिर्वृत्रासुरे सर्पे पुंसि ईहोद्यमवांछयोः।कुहूः स्त्री कोकिलालापे नष्टेंदुक
लदर्शयोः।२।ग्रहोऽनुग्रहनिर्बंधग्रहणेभुरणोद्यमे।स्त्रियां देहभृतनादोच सैंहिकेयोपरागयोः।३।ग्राहो ग्रहेऽवहारे च गुहः षाण्मातुरे गुहा।सिंहपुर
च्छ्यां च गर्त्ते च पर्वतादेश्च गह्वरे।४।गृहं गृहाश्च पुंभूम्नि कलत्रेऽपि च सद्मनि।नाहस्तु बंधने कूटे प्रोहो गजांघ्रिपर्वणोः।५।वाच्यवल्लिपुणेतेकेवर्हं
पिच्छे दले स्त्रियां।वऊस्याआदिसंख्यासुविपुलेप्यभिधेयवत्।६।महीनद्यंतरे भूम्नो महउत्सवतेजसोः।अपमोहोन्यलिंगः स्याद् अविद्यायां च मू
छने।७।लोहोस्त्रीणस्त्रुके लोहे जोंगके सर्वतैजसे।वहः स्याद् वृषभस्कंधे वाहे गंधवहेऽपि च।८।वाहो भुजे पुमान्मानभेदाश्ववृषवायुषु।व्रीहिः साम
न्यधान्ये स्याद् आशुधान्ये तु पुंस्ययं।९।व्यूहः स्याद् बलविन्यासे निर्माणे वृंदतर्कयोः।सहो बले न स्त्रियां स्यात् स्त्रियां तु नखमेषजे।१०।दंडोत्पला सुजप्रणी
कुमारी पृथिवीषु च।सिंहः कंठीरवे राशौ सत्तमे चोत्तरस्थितः।११।सिंही तु कंटकार्यां स्याद् वार्त्ताकी वासकेऽपि च।स्नेहः स्यात्तु सिते त्वादिरसद्रव्ये च
सौहृदे।१२।हत्रिः। ।अत्यूहो नीलिकायां स्त्री कालकंठखगे पुमान्।आग्रहोऽनुग्रहाग्रयोराक्रमे ग्रहणेऽपि च।१३।आरोहस्त्ववरोहे च वरारोह
हाकृदावपि।आरोहणं गजारोहे दीर्घत्वे च समुच्छ्रये।१४।उत्साहस्तूद्यमे सूत्रे कटाहः कूर्मकर्परे।द्वीपस्य च प्रभेदे स्यात् तैलादेः पाकभाजने।१५।
जायमानविषाणाग्रमहिषीशावकेऽपि च।कलहः उष्कालेना खङ्गकोषे च मंडने।१६।दात्यूहस्तु पुमान्कालकंठचातकपक्षिणोः।निग्रहो भर्त्सने पि
स्यान्मर्यादायां च बंधने।१७।निर्यूहः शिखरे द्वारे नियासे नागदंतके।निरूहो वस्तिभेदे स्याद् ऊहस्फूर्ते च निश्चिते।१८।प्रग्राहस्तु तुलासूत्रे वृषादिप्रग्रहे

६०

रामः
६०

ऽपि चा।पटहो ना समारंभेऽप्यानके पुन्नपुंसकं।२२।प्रवहस्तु बहिर्यात्रा मैत्ताऽरिश्व प्रभेदयोः।प्रग्रहस्तु तुलासूत्रे वंधे नियमने भुजे।२०।हयादिरश्मौ र॰
श्मौ च स्तु वर्णानुमहीरुहे।प्रवाहस्तु प्रवृत्तौ स्यादपि स्रोतसि वारिणः।२१।वराहः सूकरे विष्णौ मानभेदेऽद्रिमुस्तयोः।वाराही मातृभेदे स्याद्विष्वक्सेन॰
प्रियौषधौ।२२।राजार्हं जोंगके क्लीवं राजयोग्येऽभिधेयवत्।विग्रहः काय विस्तारे विभागे तारणे स्त्रियां।२३।विदेहः कायशून्ये स्याज्जनकान्वयभूमिपे।
वैदेही रोचनासीता वणिक्स्त्री पिप्पलीषु च।२४।संग्रहो ह्रहदुद्वंगे ग्रहसंक्षेपयोरपि।सुवहा शल्लकी लावली गोधापदीषु वीणायां।२५।रास्नाशेफालि
कयोः स्त्री सुखवाह्येऽन्यलिंगः स्यात्।हचतुः। ।अवग्रहो वृष्टिरोधे प्रतिबंधे गजालिके।२६।अभिग्रहोऽभिग्रहणेऽभियोगेऽपि च गौरवे।अवरोहो
ऽवतरणे व्यारोहे च लतोद्गमे।२७।अश्वारोहोऽश्वगंधायां स्त्रियां त्रिषु अश्ववाहके।उपनाहो व्रणालेपपिंडे वीणानिबंधने।२८।उपग्रहः पुमान्वंद्यामु
पयोगेऽनुकूलने।स्याद्गंधवाहो नासायां पुल्लिंगो मातरिश्वनि।२९।तनूरुहं तु लोम्नि स्यात्पतत्रे च नपुंसकं।तमोपहः सहस्रांशुमृगांकाजिनवह्नि
षु।३०।प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे।द्विजेभ्यो विधिवद्देये तद्ग्रहे च ग्रहांतरे।३१।परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः।शापे परिवहो राज
योग्यद्रव्यपरिच्छदे।३२।परीवाहो जलोच्छ्वासे महीभृद्योग्यवस्तुनि।पितामहो विरंचौ स्यात्तातस्य जनकेऽपि च।३३।महासहो माषपर्ण्यां म्लानेऽपि
च योषिति।हपंच। ।प्रपितामहश्शब्देवं विधौ पितुः पितामहे।इति हांतवर्गः।। ।।अथाव्ययानि वक्ष्यंते व्यक्तं स्वर्गादितैः क्रमैः।अकारादौ ततश्चास्मि
न्तस्मादप्यतिरिच्यते।१।अश्शब्दः स्यादभावेऽपि स्वल्पार्थप्रतिषेधयोः।अनुकंपायां च तथा वासुदेवे त्वनव्ययः।२।आः प्रगृह्यः स्मृतौ वाक्येऽनुकंपायां स
मुच्चये।इ भेदे च रुषोक्तौ चापाकरणानुकंपयोः।३।ई विवादेऽनुकंपायां लक्ष्म्यां पुनरनव्ययं।उ संबोधनरोषोक्त्योरनुकंपानियोगयोः।४।पद पूरणे च
पादपूरणेऽपि च दृश्यते।ऊ वाक्यारंभरक्षाऽनुकंपास्वपि च दृश्यते।५।ऋ प्रश्नेऽपि गर्हणे वाक्ये देवां वा यां त्वनव्ययं।ॠ वाक्यारंभरक्षायां वक्ता स्मृत्यां रन
व्ययं।६।देवात्मायां दनौ चापि भैरवे दनुजे गतौ।लृकारो देवतात्मायां भुवि कुंथे च कीर्त्तितः।७।लॄकारो देवनार्यां स्यान्नाय्यां तन्मात्र्यपि मातरि।ए स्मृतौ व
पस्मृत्यानुकंपामंत्रणे स्मृतिषु।८।ऐ शब्दो दृश्यते स्मृतौ स्मृत्यामंत्रणयोरपि।ओ संबोधने आकाने स्मरणे चानुकंपने।९।औ शब्दः कथितो हूतौ तथा॰

संबोधनेपि च ।स्त्री तु विश्वंभरायां स्यात् पुमाँस्तु निस्वने स्मृतः ।१०। के कम् । ।कु पापे चेषदर्थे च कुत्सायां च निवारणे । कद्विः । ।धिग् भर्त्सने च निंदायां ।कत्रिः
। ।मनाग् प्यल्पमंदयोः ।११। हिरुक् शब्दो विनार्थे च मध्यार्थेपि च दृश्यते । ।गद्विः ।अंग संबोधने हर्षे संगमासूययोरपि ।१२। ङद्विः । ।आङ् सीमाया
मभिव्याप्तौ क्रियायोगे षदर्थयोः ॥ ।चैकम् । चान्वाचयसमाहारेष्वन्योन्यार्थे समुच्चये ।१३। पक्षांतरे तथा पादपूरणेप्यवधारणे । ।चद्विः ।किंचारं
भे च साकल्ये प्राक् सर्वस्मिन्नवांतरे ।१४। अग्रे प्रभाते ऽतीते च देशे दिक्कालयोरपि । चत्रिः । ।तिर्यक् तिरोऽर्थे वक्रे च विहंगादौ त्वनव्ययं ।१५। ननु
च प्रश्नदुष्टोक्त्योः सम्यक् दृढप्रशंसयोः । ञद्विः । ।नञ् भावे निषेधे च स्वरूपार्थेप्यतिक्रमे ।१६। ईषदर्थे च सादृश्ये तद्विरुद्धतदन्ययोः । ठद्विः । सु
ष्ठु प्रशंसनेपि स्यात् लक्ष्यर्थे च निगद्यते ।१७। ठत्रिः । अपष्ठु निरवद्ये च शोभनार्थे च दृश्यते । णचतुः । अंतरेण पदं विद्याद् विनामध्यार्थयोरपि ।
ना नेकम् । तु पादपूरणे भेदे समुच्चयेऽवधारणे । पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे ।१९। तद्विः । अति शब्दः प्रशंसायां प्रकर्षे लंघनेपि च । नि
तांतासंप्रतिक्षेपवाचे कोप्यक्षदर्शितः ।२०। अस्तु स्यादभ्यनुज्ञाने ऽप्यसूयापीडयोरपि । प्रतिक्षेपे प्रशंसायां प्रकर्षे लक्षणेपि च ।२१। असत्यस्यर्थे उद्दिष्ट
मिति हेतौ प्रकाशने । निदर्शने प्रकारे स्यात् परस्त्यनुकर्षयोः ।२२। समाप्तौ च प्रकरणे ऽप्युतास्यर्थविकल्पयोः । समुच्चये वितर्के च प्रश्ने च पदपूरणे ।
२३। उत्स्यात् प्रश्ने वितर्के च चेत् कुत्सितप्रशंसयोः । पक्षांतरे प्यसाकल्ये जातु स्याद् विगर्हणे ।२४। कदाचिदर्थे वितथा ऽन्ये ऽविकल्पनिषेधयोः । प्रतिभृति
निधावित्यं मुतात्व्यानाभिमुख्ययोः ।२५। मात्रार्थे भागवीप्सासु लक्षणप्रतिदानयोः । वतामन्त्रणसंतोषखेदानुक्रोशविस्मये ।२६। स्वस्ति स्यान्मंगले
पुण्ये प्याशंसायामपि क्वचित् । स्वित् प्रश्ने च वितर्के च तथैव पदपूरणे ।२७। हंत वाक्यारंभखेदविषादहर्षसंभ्रमे । ।तत्रिः । आराद् दूरसमीपे च ।
कच्चित् कामप्रवेदने ।२८। प्रश्ने हर्षे मंगले च किमुत प्रश्नवितर्कयोः । विकल्पे ऽतिशये विस्यात् तावन्माने ऽवधारणे ।२९। संभ्रमे च परिच्छेदे तथा कार्त्स्न्येऽधिका
रयोः । पश्यत स्यात् प्रशंसायां विस्मये च निगद्यते ।३०। पश्चात् त्रितीव्यां परमेप्यधिकारेपि दृश्यते । यच्चेत् प्रश्ने वितर्के च यावत् कार्त्स्न्ये ऽवधारणे ।३१। प्रशं
सायां परिच्छेदे मानाधिकारसंभ्रमे । पक्षांतरे च शश्वत् स्यादात्म प्रश्ने च मंगले ।३२। पुराकल्पे सदार्थे च पुनरर्थे च दृश्यते । सकृत् सहैकवारे स्या

६१

राम:
६१

त्वसाक्षाद्वा अत्यक्षतुल्ययोः। ३३। तच्चतुः। ।अहो बतानुकंपायां खेदे संबोधनेपि च। पुरस्तात्प्रथमे प्राच्यामग्रतोर्थे पुरार्थयोः। ३४। थद्विः। अथो अथो
संशये स्यातामधिकारे च मंगले। विकल्पानंतरप्रश्नकार्त्स्न्यारंभसमुच्चये। ३५। तथाऽभ्युपगमे हृष्टप्रतिवाक्ये समुच्चये। सदृशे निश्चये विस्माद्ययोर्
तुल्यार्थमानयोः। ३६। प्रशंसायां वृथा वंध्ये। थत्रिः। ।निष्कारणेऽन्यथा पुनः। वितथे चापरार्थे च सर्वथा हेतुवादयोः। ३७। दद्विः। उत्प्रकाशे विभागे
च शाबल्यास्वास्थ्यशक्तिषु। प्राधान्ये बंधने भावे मोक्षे लाभोर्ध्वकर्मणोः। ३८। यम ऊर्हाहीं लव घ्नत्योर्ये दिग्गर्हाविकल्पयोः। धद्विः। अधि स्यादधिकारे चापीश्व
रे च निगद्यते। ३९। निकम्। ।नस्यान्निषेधोपमयोर्नि निवेशान्वेशार्थयोः। नित्यार्थे संशये हेपकोणालोपरमेषु च। ४०। सामीप्याश्रयदानेषु मोक्षोत
भीव बंधने। राश्यधोभावविन्यासेन्तुवितर्कोपमानयोः। ४१। विकल्पानुनयातीतेप्रश्ने हेत्वपदेशयोः। नद्विः। ।अनु हीने सहार्थे च पश्चात्सादृश्ययो
रपि। ४२। लक्षणेत्थंभूताख्यानभागवीप्सास्वनुक्रमे। आयामे च समीपे च किन्तु प्रश्नवितर्कयोः। ४३। घन विस्मये साकल्ये ननु प्रश्ने विनिग्रहे। अनुर
प्रश्नेपरकृतावधिकारे च संभ्रमे। ४४। आमंत्रणेप्यनुनये प्रश्नानुज्ञावधारणे। नाना शब्दो विनार्थेपि तथानेकोभयार्थयोः। ४५। स्यानेनुकरणे
र्थे स्याद्युक्तसादृश्ययोरपि। पद्विः। ।अपस्यादपकृष्टार्थे वर्जनार्थे वियोगयो। ४६। विपर्यये च विकृतौ चौर्ये निर्देशहर्षयोः। अपि संभावनाप्र
श्नशंकागर्हासमुच्चये। ४७। तथा युक्तपदार्थेपि कामचाराक्रियासु चाउपसादधिकार्थे च हीनार्थासन्नयोरपि। ४८। मद्विः। ।अभीत्थंभूतक
थने चाभिमुख्याभिलाषयोः। मेकम्। ।मा वारणे विकल्पे च स्माऽतीते पादपूरणे। ४९। स्यान्मंगलेपरकृतावप्रातिकसहार्थयोः। मद्विः। ओं र
त्तानि निश्चयस्त्वोंकारेऽङ्गीकृतावपि। ५०। प्रश्नेपि स्याद्दूरुकोक्तौ इच्छायामोमुपक्रमे। प्रणवे चाभ्युपगमे चापाकृतौ च मंगले। ५१। कंपादपूर
णेतो पमस्तके चसुखेपि च। किं कुत्सायां वितर्के च निषेधप्रश्नयोरपि। ५२। किमु संभावनायां स्याद्विमर्शेपि हि दृश्यते। नाम कोपेऽभ्युपगमे विस्मये
स्मरणेपि च। ५३। संभाव्यकुत्साप्राकाश्यविकल्पेपि च दृश्यते। यत्कल्याणे सुखे संतुष्णे भनार्थे समर्थयोः। ५४। संगार्थे च प्रहृष्णार्थे सामि निंदार्द्ध
योर्मतं। हं रुषोक्त्या वनुनये ऊं स्त्रत्या वप्यपाकृतौ। ५५। अर्थे प्रश्नेऽप्यनुज्ञायां हूं स्यात्प्रश्नवितर्कयोः। मत्रिः। ।अलं भूषणपर्याप्ति वारणेषु नि

रर्थके।५६। शक्तावेवं प्रकारे स्यादङ्गीकारेऽवधारणे। अर्थोपक्षेपरहितानुपमादश्चयोरपि।५७। कथं हर्षे च गर्हायां प्रकारार्थे च संभ्रमे। प्रश्ने सं-
भावनायां च कामं चानुमतौ स्मृतं।५८। प्रकाशे चाप्यसूयायां तथाऽनुगमनेऽपि च। जोषं सुखे प्रशंसायां तूष्णीं लंघनयोरपि।५९। नूनं तु निश्चिते त-
र्के स्मरणे वाक्यपूरणे। परं नियोगे दोषे च प्राध्वं नम्रानुकूलयोः।६०। सत्यं प्रश्नेऽभ्युपगमे मचतुः। ।ऽवश्यं नित्यप्रयत्नयोः। अभीक्ष्णमुज्जरस्थाने शी-
घ्रप्रकर्षयोरपि।६१। इदानीं वाक्यभूषायां संप्रत्यर्थे च दृश्यते। तद्दिने दिनमध्ये स्यात्तथैव प्रतिवासरे।६२। सांप्रतं चाधुनार्थे स्यादुचितार्थे च दृश्यते।
यद्विः। ।अयि सम्यगनुनययोस्तथा संबोधनेऽपि च।६३। अये क्रोधविषादे च संभ्रमे स्मरणेऽपि च। दिष्ट्या हर्षे मंगले च पाप्यप्राहस्तु विस्मये।६४। प्रशंसा-
यामपि तथा। यत्रिः। ।समयांतिकमध्ययोः। रैकं। ।प्रकर्षे गतावेघ्यर्थेष्व। रद्विः। ।ऽरे आह्वलसूययोः।६५। उरर्यूरी चाप्युभौ शब्दौ विस्तारेऽङ्गीकृतावपि-
दुर्निबंधे च। दुष्टे च निर्निर्णय निषेधयोः।६६। परिस्यात्सर्वतोभावे वर्जने व्याधिशेषयोः। इत्थंभूताख्यानभागवीप्सालिंगनलक्षणे।६७। दोषाख्याने
निरस्तने स्पर्श जात्याः स्यादाश्मभूषणे। परा विमोक्षे प्राधान्ये प्रातिलोम्ये प्रधर्षणे।६८। आभिमुख्येऽभ्यर्थे च विक्रमे च गतौ वधे। पुरा पुराणे निकटे प्रबंधा-
तीतभाविषु।६९। स्वः प्रेत्य स्वर्गनाकेषु पंतः स्वीकारमध्ययोः। रत्रिः। ।अंतरापि विनार्थे स्यान्मध्यार्थे निकटार्थयोः।७०। उररर्युररी च विस्तारें-
गीकृतौ त्रयं। नकिं निषेधोपमयोः आदुः प्राक्तोप्रश्नपृच्छ्यते।७१। संभाव्ये च प्रवृत्तौ च पुनरप्रथमे मतं। अधिकारे च भेदे च तथा पश्चात्तरेऽपि च।७२। लद्विः। ।
किल शब्दस्तु वार्तायां संभाव्यानुशयार्थयोः। खलु स्याद्वाक्यभूषायां जिज्ञासायां च सांत्वने।७३। वीप्सामानानिषेधे पुनरेणपदवाक्ययोः। वैकम्। ।वा स्याद्वि-
कल्पोपमयोर्वितर्के पादपूरणे।७४। समुच्चये च विस्त्रंभे नानार्थातीतयोरपि। विनिग्रहे नियोगे च तथैव पदपूरणे।७५। निश्चये सहने हेताववव्या। हि वि नियो-
गयोः। ईषदर्थे परिमवेऽस्मृष्यावलंवनेऽपि च।७६। विज्ञाने। वद्विः। ।ऽथैव चोपमायां नियोगे वाक्यपूरणे। अवधारणे च चारं नियोगे च विनिग्रहे।७७। षद्विः। ।उ-
षारञ्जोतरंते च दोषारात्रौ चतनुरेवामं तु शीघ्रे स्वार्थे च। वत्रिः। ।निकषांतिकमध्ययोः।७८। सैकम्। ।सुष्टुत्यायां प्रशार्थानुमतिष्केषु सम्यद्विषु। सद्विः।
आः स्मरणेऽपाकरणे कोपसंतापयोरपि।७९। ईईः दुःखभावने कोपे निर्निबंधे च निश्चये। साकल्पातीतयोर्मोलि संबोधनविषादयोः।८०। सत्रिः। ।अंजसा

रामः
६२

६३

शाश्वत आख्यातस्तत्त्वतूर्णौ र्थयोरपि॥ तिरोऽन्तर्द्धौ तिर्य्यगर्थे नीचैः स्वैराल्पयोर्मतः॥८२॥ पुरोऽग्रे प्रथमे प्योऽधिकारे च पुनः पुनः॥ मिथोऽन्योन्यं रहो र्थे च शनै
स्वैरे शनैस्त्वरे॥८३॥ सत्वं तु॥ अभितः शीघ्र साकल्य समुखोभयतोन्तिके॥ अग्रतः प्रथमे चाग्रे पुरतः प्रथमाग्रयोः॥८४॥ स्फुर्द्वैद्यु: प्रातः कीले स्यात्तथैव धर्मेवा
सरे। हे कुरु॥ हस्ता संबोधने पादस्मरणे च विनिग्रहे॥८४॥ नियोगे च हि पापीयस्याः कुत्सा यामपि हंस्पते हा विषादे च शोके च कुत्सा दुःस्तार्थयोरपि॥८५॥ हिरु
पादस्मरणे हेतौ विश्लेषेप्यवधारणे प्रश्ने हेत्वपदेशे च सम्भ्रमासूययोरपि॥८६॥ हो दुःखहेतावाख्याता विषादे विस्मयेऽपि च॥ हे संबोधनमात्रे नौ न्यूनस्त्व-
यासे च दृश्यते॥८७॥ हे संबोधनमात्रे काने हो हो श्रृष्टौ तथैतयोः॥ हद्धिः॥ अहह प्रशंसाक्षेपयोर्नियोगे च विनिग्रहे॥८८॥ अहो धिगर्थे शोके च क-
रुणार्थे विषादयोः॥ संबोधने प्रशंसायां विस्मये पदस्मरणे॥८९॥ असूयायां वितर्के स्यादा हन्त्येपनियोगयोः॥ आहे प्रश्ने विचारे च सहसाकल्प
इष्यते॥९०॥ विद्यमाने च साहत्वे योगपद्ये समृद्धिषु॥ संबंधे च तथा ही ही शृङ्गो विस्मयहास्ययोः॥९१॥ हे हे संबोधने हन्तो हो हो श्रृष्टस्तथैतयोः
॥ हत्रिः॥ अहह हे तद्भुतखेदे परिक्लेशप्रकर्षयोः॥९२॥ संबोधने पि चो नाहो परिप्रश्नविचारयोः॥ इत्यव्ययानेकार्थवर्गः॥ ॥ ॥ उत्पलि-
नी शब्दार्णव संसारावर्त्तनाममालाख्यान्॥ भागुरि वररुचि शाश्वत वोपालित रतिदेव हरकोशान्॥१॥ अमरशुभांक हलायुध गोवर्द्धन रभस
पाल कृतकोशान्॥ रुद्रामरदत्ताजयगंगाधर धरणिकोशांश्च॥२॥ हारावल्यभिधानत्रिकाण्डशेषं च रत्नमालां च॥ अपि बहुदोषं विश्वप्रकाश
कोषं च सुविचार्य्य॥३॥ वाग्भट माधव वाचस्पति धर्म्म व्याडितारपालाख्यान्॥ अपि विश्वरूप विक्रमादित्य नामलिंगानि सुविचार्य्य॥४॥ कात्या-
यन वामन चंद्रगोमि रचितानि लिंगशास्त्राणि॥ पाणिनि पदानुशासन पुराणकाव्यादिकं च सुनिरूप्य॥५॥ षट्प्राणगाधाकोशप्रणयनविख्या-
त कौशलेनायं॥ मेदिनिकरेण कोशः प्राणकरः सुनारचितः॥६॥ इति मेदिनिकरकृतानेकार्थकोशः समाप्तः॥ ॥ संवत् १९०९ चैत्र वदि १२ गुरौ॥
सुधांशाकाशकाबनिमितशके विक्रमर्वेर्मधोः श्रुक्लेपक्षे सुरगुरौ तिथौ गीष्पति दिने। गणेश व्यासो हं समलिखम् इमं कोषं वरं वरानेकार्थं
मेदिनिकरकृतं नागरवरः॥१॥ ॥ ॥ ॥ ॥ ॥ ॥

राम:
६३